CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 726

Title Prabodhacandrodaya
with com.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 726 Subject: Nātaka.

Title: Prabodhacandrodaya with com.

Author: Gaṇeśa Dixit. Scribe: Bālakrisṇa.

Date of the work: – Date of the Ms.: V. S. १७७१

Place of the work: – Place of the Ms.: Sūryapattra.

Size: 10.4" by 6" Extent: 50 foll. no. 1 missing

Language: Sanskrit. Script: Devanāgari

Remarks: Begins abruptly.

यस्यतात्विकंस्वरूपंविद्वांसश्रवणमननादिक्रमेणसाक्षात्कृतवंतोनिमीलंतिनिस्यंति।आत्मस्वरूपातिरिक्तेननवर्त्तीत्यर्थः।त्रै
लोक्यमितिसमनुषंगः।स्रजिमालायांतद्विषयाज्ञानादुद्भूतोभोगिभोगःसर्पशरीरंतेनोपमेयं।एतत्त्रैलोक्यविशेषणंयथातत्त्वज्ञाना
न्नदतिरिक्तंसर्पशरीरंनभवतिकिंतुमालास्वरूपात्मनातिष्ठते।तथाअद्वैतब्रह्मसाक्षात्कारात्प्रपंचआश्रयस्वरूपातिरिक्त
रूपेणतिष्ठतीत्यर्थः।एतेनअभिधेयंअद्वैतंप्रतिपाद्यप्रतिपादकभावसंबंधोऽनर्थनिवृत्तिःप्रयोजनंतत्कामोऽधिकारीत्य
पिदर्शितं॥१॥

अपिच। ।अंतर्नाडीनियमितमरुल्लंघितब्रह्मरंध्रंस्वांतेशांतिप्रणयिनिसमुन्मीलदानंदसांद्रं।प्रत्यक्ज्योति
र्जयतियमिनःस्पष्टलालाटनेत्रव्याजव्यक्तीकृतमिवजगद्व्यापिचंद्रार्धमौलेः॥२॥नांद्यंतेसूत्रधारः।अलमति
विस्तरेण।आदिष्टोस्मिसकलसामंतचक्रचूडामणिमरीचिमंजरीनीराजितचरणकमलेन।बलवदरिनिवह
वक्षस्तटकपाटपाटनप्रकटितनृसिंहरूपेण।प्रबलतररिपुनरपतिकुलप्रलयमहार्णवनिमग्नमेदिनीसमुद्धरणम
हावराहरूपेण।निखिलदिग्विलासिनीकर्णपूरीकृतकीर्तिलतापल्लवेन।समस्तशास्त्रबेरमकरणतालास्फालनब
हुलतरपवनसंपातनर्तितप्रतापानलेनश्रीमतागोपालेन।

स्वामी इदानींप्रचुरतरमंगलंप्रचुरतरविघ्ननिवारणायालमितिकर्त्तृत्वोपाधिविशिष्टंलीलाविग्रहधारिणंपुरुषधौरेयंस्तौ
ति।अंतर्नाडीति।अपिचेतिसर्वमंगलसमुच्चयार्थंचंद्रार्धमौलेःशशिशेखरस्यप्रातिकूल्येनजगद्दृष्टाॐकारात्सत्यज्ञानानंदादिल
पतयात्रनवप्रकारातेतत्प्रत्यक्ज्योतिप्रकाशात्मजयतिसर्वोत्कर्षेणवर्त्तते।अन्यनिरपेक्षत्वंसर्वोत्कर्षः।कथंभूतं।अंतर्नाडीसुषुम्णात
यानियमितःसन्निरुद्धःमरुत्वायुःतेनलंघितमतिक्रांतंब्रह्मरंध्रंयेनतत्तथा।कस्मिन्सति।स्वांतेचित्तेशांतिप्रणयिनिनिरींद्रियपदाव
लंबेसतीत्यर्थः।पुनःकथंभूतं।समुन्मीलन्प्रादुर्भवन्नानंदस्तेनसांद्रंनिविडंअच्छिन्नमितियावत्।कथंभूतस्यचंद्रार्धमौलेः।यमिनःयोग

सक्तस्य। नच कविकृत्स्त्रे हते स्योतिः किं हतमिव। स्पष्टमिव प्रकटं ललाटनेत्रं तृतीयं चक्षुस्तद्व्याजेन मिषेणाव्यक्तीकृतमिव। पुनः की
दृशं जगत्। व्यापि जगद्विषया कीर्त्तिर्यस्य। अत एव नवचन्द्रकिरणसंभ्रान्तिशुक्लिसदृशमित्यर्थः॥ ।नान्द्यन्ते इति। कथां प्रस्तावयिष्यम
हा। ।नान्द्यन्ते इति। नाटकाद्यमंगलश्लोको नान्दी। सूत्रधारो नाटकाचार्यः॥ उवाचेति शेषः। अलमिति। नान्द्या द्वादशाष्टादशपदया अपि
संपन्नवादित्रिजातैः। आदिष्टोस्मि। आज्ञप्तोस्मि। गोपालदेवेनेत्यन्वयः॥ कीदृशेन गोपालदेवेन। सकलाः समस्ता ये सामन्ता मंड
लेश्वरास्तेषां चक्रं समूहः तस्य चूडामालिकेव तन्मरीचिमंजरी किरणसंततिस्तत्पानी राजिने वरणकमले यस्य तादृशेन। बल
वन्तो ये शत्रुसमूहास्तेषां वक्षःस्थलमेव कपाटं तस्य पाटने विदारणे प्रकटितं दर्शितं नृसिंहरूपं येन। एवंभूतेन। पुनः प्रबलतरा अति
शयितबलशालिनो निजप्रतिकूला निते पांप्रलये विनाशरूपे महार्णवे मग्नायां मेदिन्यां तस्याः समुद्धरणे महावराहरूपमहाव
राहः। तेन पुनः निखिला यादिग्भित्तिसिन्यादिरूपा विलासिन्यस्तासां कर्णपूरीकृतः कीर्तिरूपलतापल्लवो येन। एतेन दिगन्तेषु य
शो विश्रांतमित्युक्तं। पुनः सकलदिग्गजकर्णतालास्फालनेन बकुलतरो घनपवनसंपातस्तेन नर्त्तितः प्रतापरूपो अनलो य
स्य तथा भूतेन। अनेन यशोव्याप्तिरिव प्रतापव्याप्तिर्दर्शिता॥

यथास्वच्छस्य सहजसुहृदो राज्ञः श्रीकीर्तिवर्मदेवस्य दिग्विजयव्यापारान्तरितपरब्रह्मानंदरसैरस्माभिः स
मुन्मीलितविविधविषयरसस्पर्शादूषिता इव अतिवाहिता दिवसाः। इदानीं कृतकृत्यास्त एव वयं। ।यतः नीताः क
क्षयं क्षितिभुजो नृपतेर्विपक्षा रक्षावती क्षितिरभूत्प्रथितैरमात्यैः। साम्राज्यमस्य विहितं क्षितिपालमौलिमालार्चि
तं भुवि पयोनिधिमेखलायां॥२॥

आदेशमेव निरूपयति यथेति। स्वच्छस्य निर्दोषस्य स्वभावसुहृदो राज्ञः श्रीकीर्तिवर्म कवचं यस्य एतादृशस्य कीर्तिवर्मनाम्नो
देवस्य क्रीडनशीलस्य यो दिग्विजयस्तद्व्यापारान्तरितपरब्रह्मानंदरसो येषां एतादृशैरस्माभिः समुन्मीलिताः सम्यक्प्रकटं नवपथ २
मारूढा विविधा नानारूपस्रक्चीवरचंदनवनितादयो विषयास्तेषां रसस्पर्शेन सुखवत्तु नवेन इव विषयसुखहेतुत्वादित्यर्थः दिव
सा अतिवाहिता गमिताः॥ तत्कृतकृत्यतां दर्शयति। ।यत इति। ।नीताः क्षयमिति। ।नृपतेर्विपक्षाः शत्रवः क्षितिभुजो राजानः क्षयं नीताः

विजयलक्ष्मीः समासादिता इत्यन्वयः। केनकमिव। मन्दरमथनेन श्रीकृष्णेन क्षीरसमुद्र इमिव। कर्णंभूतेन निजभुजबलविक्रमैके
न निर्जितसकलराजमण्डलं येन तादृशेन। कथंभूतं कर्णसैन्यसागरं। आकर्णाकृष्टकठिनकोदण्डो धनुर्यन्त्रिर्मुक्ततीव्रवेगशरनिकरो बा
णसमूहस्तेन जर्जरीकृतास्तुरंगा एव तरंगमाला यस्मिंस्तथाभूतं। पुनः कथंभूतं। निरंतरं निपतन्ति विविधशस्त्राणि स्तस्तेन पतितानि
सहस्राणि अपरिमितानि शस्त्राणि तैः पर्यस्ताः इतस्ततः पतिताः तुंगा अत्युच्चा मातंगा गजास्त एव महान्तो महीधरा महापर्वतास्ते
सहस्रे यस्मिंस्तथा। पुनः कथंभूतं। भ्रमन्तो भुजदण्डः स एव चण्डमंदरस्तस्य निघातेन घूर्णितः सकलाये पत्तयः त एव सलिलघातास्स
लिलसमूहा यस्मिंस्तादृशं। इदं वक्कर्णसैन्यसागरोपमं विशेषणत्रयेण दर्शितं

ग्राहिघाटघूर्णन्तसकलपत्तिसलिलसंघातंकलसिलसारं गम्भीरमनुजमहार्णवं विपक्षीरसमुद्रं समासादितविजय
लक्ष्मी तस्मात्संपदं स्वअलघुगुणिअणसलावहिताकंवीरचरित्रस्तदधंतारिरतसमोरत्नसंवृत्तो। ।सूत्रधारः। आर्ये निसर्गसौम्य
मेवकाले मनोतिः उतोपिकारणात्वाल्लविकारमपि पुनः स्वभावएवावतिष्ठते। ।यतः सकलनृपालकुलप्रलयाग्निरुद्रे
ण चेदिपतिना समुन्मूलितं चन्द्रान्वयपार्थिवानां पृथिव्यामाधिपत्यं स्थिरीकर्तुमयमस्य संरम्भः ।परप। तथाहि। कल्पां
तवातसंक्षोभलंघिताशेषक्ष्मभृतः स्थैर्यप्रसादमर्यादास्ता एव हि महोदधेः॥प। ।अपिच। ।भगवन्नारायणांशसंभूता
भूतहिताय तथाविधैः पौरुषरूपणगुरुषा क्षितितलमवतीर्यनिष्पादितकृत्याः पुनः शांतिमेवप्रपद्यंते॥

सूत्रधार इत्यादि। सकलाये नृपालास्तेषां यत्कुलं तस्मिन्प्रलयाग्निवत् रुद्रेण चेदिपतिना चेदिदेशाधिपेन राज्ञा समुन्मीलितः
चंद्रान्वयः सोमवंशो येषां तादृशानां पार्थिवानां राज्ञां कीर्तिवर्मप्रभृतीनामित्यर्थः। संरंभः कोपः। तथाच वैमित्रिकोन स्वाभावि
क इति भावः। अर्थान्तरन्यासेन दृढयति। परप तथेति। कल्पांतवातेन यः संक्षोभस्तेन लंघिता अशेषक्ष्मभृतः पर्वता येन यस्य म
होदधेः समुद्रस्य। ता एव प्रकृतिभूता एक स्थैर्यनिश्चलत्वं प्रसादः स्वच्छत्वं मर्यादा वेलालंघनरूपा एता इत्यर्थः। भूतहिताय प्राणिनां हि
ताय इत्यर्थः॥

येन त्रिःसप्तकृत्व इति। सोऽपि स्ववीर्येति वृत्तद्वयं। सोऽपि श्रीमान् जामदग्न्यः मुनिस्तपोभिः शाम्यति। किं कृत्वा। नृपाणां कुलं सकुटुम्ब-
पा। ततः ऊतं त्यक्त्वा तत्क्षमे भारं स्ववीर्यादवतार्य वा कीदृशः। प्रशांतकोपाग्निः। सः कः। येन त्रिःसप्तकृत्वः एकविंशतिवारं भूरि-
च्युतं यत् रुधिरं तस्य सरितः वारिपूरे अभिषेकः पितृतर्पणादिकं कारितं। कथंभूते पूरे। नृपाणां बहुलवसामांसनिष्क-
पंकः कपालांतर्वर्त्ती धातुविशेषः एतत्त्रितयं प्राग्भारे तटे यस्य तथाभूते। पुनः सः कः। यस्य सो कुठारः परशुः। स्त्रीबालवृ-
द्धावधि यन्निधनं मारणं तद्विधौ इति कर्त्तव्यतायां विश्रुतः ख्यातः। कथंभूतः कुठारः। राजन्यानामुच्चाये अग्रे मास्कंधास्तेषां कू-
टे समूहस्तस्य क्रथने विदारणे पटुः ऊर्ध्वलारटंती शब्दायमाना घोरा भयावहा धारा यस्य सः।

तथाहि। परशुराममेव तावदाकलयत्तु भवती॥ । येन त्रिःसप्तकृत्वो नृपबहुलवसामांसमस्तिष्कपंकप्राग्भा-
रेऽकारि स्फुरद्रुधिरसरिद्वारिपूरेऽभिषेकः। यस्य स्त्रीबालवृद्धावधिनिधनविधौ निर्दयो विश्रुतोऽसौ राजन्यो-
च्चांगकूटक्रथनपटुरटद्घोरधारः कुठारः॥ सोऽपि स्ववीर्यादवतार्य भारं क्षमेः समर्प्य कुलं नृपाणां। प्रशांत-
कोपज्वलनस्तपोभिः श्रीमान्मुनिः शाम्यति जामदग्न्यः॥७॥ तथायमपि ज्ञातकर्त्तव्यः संप्रति परमनुपरामं ति-
ष्ठति। येन च विवेकेनैव निर्जित्य करणं मोहमिवोर्जितं। श्रीकीर्त्तिवर्मनृपतेर्बोधस्येवोदयः कृतः॥८॥ । नेपथ्ये।
आः पाप शैलूषाधम कथमस्मासु जीवत्सु स्वामिनो महामोहस्य विवेकसकाशात्पराजयमुदाहरसि॥ ॥

तथा अयमपि ज्ञातकर्त्तव्यः संप्रति परमनुपरामं तिष्ठति। ज्ञातकर्त्तव्यमेव दर्शयन् विवेकमहामोहयोः सांगोपांगयोर्जयप-
राजयौ जिन येनार्थं प्रवर्त्तयिष्यं संगतिमारचयति। येन चेति। येन ऊर्जितं बलवंतं करणं निर्जित्य कीर्त्तिवर्मनृपतेरुदयः कृ-
र्षः कृतः। यथा विवेकेन विचारेण ऊर्जितं विशेषादर्शनसहकृतं मोहं निर्जित्य कार्यासमर्थं संपाद्य बोधस्य तत्त्वानुभवस्य उद- ४
यः प्रादुर्भावः कृतः। शैलूषाधम नटाधमेत्यर्थः॥

नटो वापि नटी वापि पारिपार्श्वक एव वा। संलापा जायते ब्रूते सा तु प्रस्तावना स्मृता॥१

उत्तुंगेति। अयं कामः एति आयाति। कथंभूतः। पुलकितेन रोमांचितेन भुजेन रत्या उत्तुंगमत्स्यद्वयं पीवरं मांसलं कुचद्वयं स्तन-
युग्मं तेन पीडितं अंगं यथा स्यात्तथा आलिंगितः। पुनः कथंभूतः। श्रीमान् शोभावान्। तथा जगंति मदयन्। मदनं ऊर्ध्वं न-
यानयनाभिरामः तथा मदेन आसवेन घूर्णिते नेत्रपद्मे यस्याः रत्याः वक्त्रं कमलं। प्रस्तावना। संगतिः। यथा निर्दिष्टः। उत्तुंगपीवरेत्या-
दिनेत्यर्थः। चरताधमनटाधम। प्रभवतीति। विदुषामपि पंडितानामपि शास्त्रसंभवः विवेकस्तावत्प्रभवति यावदिंदीव-

सूत्रधारः। ससंभ्रमं विलोक्य। अये। उत्तुंगपीवरकुचद्वयपीडितांगमालिंगितः पुलकितेन भुजेन रत्या। श्रीमा-
न्जगंति मदयन्नयनाभिरामः कामोऽयमेति मदघूर्णितनेत्रपद्मः॥ मद्वचनाद्वायमुपयातकोपश्च लक्ष्य-
ते। तदपसरणमेवास्माकमतिश्रेयः इति निष्क्रांतौ। प्रस्तावना। ततः प्रविशति यथानिर्दिष्टः कामो रतिश्च।
कामः। पापेति पुनः पठित्वा ननु रे नटाधम। प्रभवति मनसि विवेको विदुषामपि शास्त्रसंभवस्तावत्। निपत-
ति दृष्टिविशिखा यावन्नेंदीवराक्षीणां॥ अपि च। रम्यं हर्म्यतलं नवाः सुनयना गुंजद्विरेफा लताः प्रोन्मील-
न्नवमल्लिकाः सुरभयो वाताः सचंद्राः क्षपाः। यद्येतानि जयंति हंत परितः शस्त्राण्यमोघानि मे तत्कोऽसौ कीदृग्वा विवे-
कविभवः कीदृक् प्रबोधोदयः॥ रतिः। अजउत्त गुरुओ खु राअमहामोहस्स पडिवक्खो विवेओ इति तक्केमि।

नाक्षीणां नीलोत्पलनयनानां दृष्टिविशिखाः दृष्टिरूपाः बाणाः न पतंति इति योजना। तावत् यावत् इति अवधौ। रम्यं हर्म्यत-
लमिति। रम्याः हर्म्यभूमिः तरुण्यः सुलोचनाः गुंजद्भ्रमराः लताः प्रोन्मीलन्नूतनमालत्यः सुगंधिवाताः पवनाः स-
चंद्राः रात्रयः। एतानि मे ममामोघानि अनिष्फलानि शस्त्राणि यदि परितः सर्वतो जयंति सर्वोत्कर्षेण तिष्ठंति तत् तदा-
सौ नरताधमेन यो वर्णितः विवेकस्य विभवः सामर्थ्यं कीदृक् न कथमपि न विषय प्रबोधोदयश्च कीदृक् न कथमपि संभावि-
तमिति भावः। रतिः प्राकृतं। आर्यपुत्र गुरुः खलु महाराज महामोहस्य प्रतिमल्लो विवेक इति तर्कयामि। ।

अन्यदेवसामर्थ्यं दर्शयति। अपि यदिति। यद्यपि विशिखाः बाणाः शराः सनं धनुः रेतत् पंचकुसुममयं तथापि ससुरासुरदेवदैत्य
सहितं अखिलं समग्रं जगत् त्रैलोक्यं मम आज्ञां अतिलंघ्य अतिक्रम्य धृतिं संतोषं मुहूर्त्तमपि न एति न प्राप्नोति। ओ कार्य।।
उक्तार्थं मुदाहृत्य दर्शयति। तथाहि। अहल्यायामिति। सुरपतिरिंद्रः अहल्यायां गौतमपत्न्यां जारः उपपतिः अभवत्। प्रजाना
थः ब्रह्मा आत्मतनयाम यासीत्। गतवान्। मिथुनभावं प्राप्त इत्यर्थः। इंदुश्चंद्रो गुरोर्बृहस्पतेर बलां पत्नीं अगच्छत्। इत्य
नेन प्रकारेण प्रायो बहुशः मम को वा पुमान पथे अमार्गे स्थानं न अकार्यं न। अपि तु सर्वोपि कारित एवेत्यर्थः।। किं बहु नोक्तेन नुव नोन्याय्यविधि पुमहाणां अमः कः नको पात्पर्यः ५

कामः। ।प्रियेऽक्षतत्त्वे दृष्टेस्वभावादकुलं नंदिविवेकादयमुत्पन्नाः अपियदिविशिखाः शरासनं वाकुसुममयं
ससुरासुरं तथापि। मम जगदखिलं वरोरु नाज्ञामिदमतिलंघ्य धृतिं मुहूर्त्तमेति। तथाहि। ।अहल्यायां जारः सुर
पतिरभूदात्मतनयां प्रजानाथोऽयासीदभजत गुरोरिंदुरबलां। इति प्रायः को वा न पदमपथे कारितमया श्रमो मा
बाणानां कइव भुवनोन्माथविधिषु।। रतिः। ।अक्रुद्ध एवं वेदोदंतदा विनिहत्य हताश्च संपदो संकिदद्यो मरा
दीनि दोसञ्ज मणि अमंप्यपुहाइ ममाचामहावला सुणीअंति। कामः। ।प्रियेयानेतान्राज्ञो विवेकस्य बलवतो
यमादीनष्टावमात्यान्पश्यसि तेएते यमनियमा अस्माभिरभियुक्तमात्रा झगेव विघटिष्यंते। ।तथाहि। ।अहिं
साकैवकोपस्य ब्रह्मचर्यादयो मम। लोभस्य पुरतः के मी सत्यास्तेयाऽपरिग्रहाः।२५।।

रतिः। आर्यपुत्र एवं न चिदं। तथापि महासहायसंपन्नःशंकितव्याः अरातिः। यतो यमनियमप्रमुखा अमात्या महाबलाः श्रूयंते।
ध कामः। अभियुक्तमात्राः घातिकृत्येन संस्पृष्टमात्राः झगेव शीघ्रमेव घटिष्यंते। विवेकाः इदं प्राप्स्यंते। तदेव दर्शयति। तथाहीति। को ५
पस्य अहिंसा केव न का पीत्यर्थः। मम कामस्य ब्रह्मचर्यादयः के न केपीत्यर्थः। अमी सत्यास्तेयाऽपरिग्रहाः लोभस्य पुरतः के न
केपीत्यर्थः। तथा चास्माकमेतेः तिसुजेयाइति भावः।। ।।

नतु तर्हि यमनियमादेः कागतिरत आह। यमेति। ईषत्कारं सुकरं सन्मूलनं छेदो येषां ते तथा चित्तस्य आस्नदधीनत्वादिति भावः। एतं दि
रुपसाधनांतरमप्याह। अपि चेति। अस्मिन्नेव राज्ञः स्मर्तव्याः एव तत्र हेतुः अपत इति। विलोकनं प्रेक्षणं भाषणं गोष्ठी विलासो
नर्त्यं परिहासः नर्मकथा केलिक्रीडा परिरंभः आलिंगनं एतानि संस्कृताः कामिनीनां स्मरणं मनसो विकाराय अलंसमर्थाः। अन्यदपि
सहायमुपदिशन् किं बहुनातोऽस्मद्वशो पिस्न विष्यंतीत्याह। विशेषत इति। अभियुज्यमाना अभियोगं प्राप्यमानानरपति
मंत्रिणं महामोहमंत्रिणं अधर्मं। रतिः। श्रुतं मया युष्माकं विवेकरामदमप्रवृत्तीनां एकमुत्पत्तिस्थानमिति। आः विस्मये।

यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयस्तुनिर्विकारविवेकसाध्यत्वादीषत्करसमुन्मूल
नाएव। ।अपिच। ।स्त्रियएव अमीषां तत्यास्तेनैते अस्मज्जीवराएव वर्तते। यतः संत्ववि लोकनभाषणविलास
परिहासकेलिपरिरंभाः स्मरणमपि कामिनीनां अलमिह मनसो विकाराय। ।विशेषतस्त्वेते मदमात्सर्यदंभलोभा
दिचिरस्नस्वामिवर्द्धनैः अभियुज्यमानान्नरपतिमंत्रिणमधर्ममेवाश्रयिष्यंति। ।रतिः। ।सुदं मए उप्पादाणं विवे
असमदंमप्पहुदीणं एक्कंउ उप्पत्तिट्ठाणं त्ति। ।कामः आः किमुच्यते एकमुत्पत्तिस्थानमिति। ननु जनक एवास्मा
कमचिन्त्यः। ।तथाहि। ।संभूतः प्रथममिहेश्वरस्य संगान्मायायां मनइति विश्रुतस्तनूजः। त्रैलोक्यं सकलमि
दं विसृज्य सृष्टस्तेनाथो जनितमिदं कुलद्वयं नः। ।तस्य प्रवृत्तिर्निवृत्तिश्च धर्मपत्नीतयोःप्रवृत्यां समुत्पन्नं म
हामोहप्रधानमेकं कुलं। निवृत्त्यां द्वितीयं विवेकप्रधानमिति।

एवमपि कस्मिन्पितरि उत्पत्तिस्थाने को विरोधः किंकुलैक्ये विरोधः सा चाश्चर्यकरी इति भावः। नन्वित्यत इति। ईश्वरः सच्चिदानंदपरब्रह्मणः संग
संबंधान्मायायामविद्यायां मन इति विश्रुतः विख्यातस्तनूजः पुत्रः प्रथमं संभूतः उत्पन्नः। तेन मनसा इदं सकलं त्रैलोक्यं विसृज्य वि
शेषेण सृष्ट्वा। अथो अनंतरं नः अस्माकं पुनः महामोहप्रधानं एकं विवेकप्रधानमिति कुलद्वयं जनितं। तस्य च विरोधबीजस्तापश्च
ावंस्कचपन्नाह। तस्येति।

रतिः। अथ तस्याराद्धस्याः किं कर्त्तव्यं। प्राज्ञापत्याहैरण्यगर्भी सरस्वती वाणी। पुंसइति। पुंसः परमात्मनः। गृहिणी वा पत्नी मनन्तनयं प्रसू
यत्तनयित्वा लोकान् खिलप्रपंचक्रमेण आकाशाद्वायुर्वायोरग्निराप इत्यादिक्रमेणाभ्यस्यतः अजीजनत्। कथंभूतस्येत्युक्तं पुंसः
संगेनाखिलप्रपंचसंबंधेन समुज्झितस्य अत्यंतरहितस्य। कथंभूता माया तेन पुंसा असृष्टापि असंबद्धापि ननु कथमिदमुपपद्य
ते इत्याशंक्य तां पुनर्विशिनष्टि। मायेति। इति हेतौ। यतः माया अनिर्वचनीया अघटनघटनापटीयसी मायेति वचनात् सर्वमिदमुपप
द्यते। पुनरनंतरमसौ विद्येति प्रसिद्धा कन्या तस्मादेव मनसः एव। विवेकादिपरंपरयोपनिषत्संगेनेत्यर्थः। यया पिता बांधवः माता च सर्वं

रतिः। अथ ताएरखवसीएर्णि किं कर्त्तव्यं। ।कामः। ।प्रिये अस्ति किलैषा प्राजापत्या सरस्वती। ।पुंसः संगसमुज्झितस्य गृहि
णी मायेति तेनाप्यस्पृष्टापि मनः प्रसूय तनयं लोकान् स्वतः क्रमात्। तस्मादेव जनिष्यते पुनरसौ विद्येति कन्या यया
तातस्तेच सहोदराश्च जननीसर्वं च ननु दग्धं कुलं। ।रतिः। ।सत्रासोत्कंपं। अज्ज उत्त परित्ताहि परित्ताहि इति भर्तारमालिंगति। ।
कामः। ।स्पर्शसुखमभिनीय स्वगतं। ।स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशा भयोत्कंपोत्तुंगस्तनयुगभरासंगसुभगः।
अधीराक्ष्या गुंजन्मणिवलयदोर्वल्लिरचितः परीरंभो मोदं जनयति च संमोहयति च। ।प्रकाशं दृढं परिष्वज्य। प्रिये न
भेतव्यं। अस्मासु जीवत्सु कुतो विद्योत्पत्तिः। ।रतिः। ।अथ किं ताएरखवसीए उप्पत्तीउम्हाणं पडिपक्खाणं संमदा॥ ॥

कुलं नश्यमात्मानमपि नाशयिष्यतीति भावः। ।रतिः। आर्यपुत्र परित्राहि परित्राहि। अलिनीव अंगवेष्टया प्रकटीकृत्य स्वगतं मन
स्येव। स्फुरदिति। अधीराक्ष्याः चंचलाक्ष्याः परीरंभ आलिंगनं मोदं आनंदं जनयति विषयांतरं विस्मारयतीत्यर्थः। कथंभूतः परीरंभः स्फुरद्रो
मोद्भेदो रोमांचो येन स तथा। पुनः कथंभूतः। भयेन उत्कंपस्तदुत्तुंगावस्तनौ तयोर्युग्मं तद्भरासंगे संगेन संबंधेन सुभगः अतिमनो
हरः। पुनः कथंभूतः। गुंजन्मणिवलयं यस्याः एतादृशी दोर्लता तया रचितः कृतः। कथंभूता पाश्चाधीराक्ष्याः तरलतरा अनीनिका यस्याः एतादृ
शी आकुला दृक् यस्याः तथा भूतायाः। ।अथ किं तस्याराद्धस्याः उत्पत्तिः अस्माकं प्रतिपक्षाणां संमता॥ ॥

रतिः। आर्यपुत्र यदि एवं तत्किमिति सोदराणाम् अपि परस्परमेतादृशं वैरं। एकामिषमिति। सहोदराणां दायादानामित्यर्थः। अन्यथा
दार्ष्टांतिकस्यासंगतत्वापातात् दृष्टांतिमित्तं यस्याः क्रियायां यथा भवति क्रियाविशेषणं। हि यस्मात्कारणात् तीव्रं दारुणं तत्
यावत् सिद्धः भुवनत्रयस्य विरोधः अभवत्। वैरस्य प्रसक्तं एकामिषप्रभवत्वं दर्शयति। सर्वमेवैतदिति। सर्वस्य मनोविकारत्वा
त्पितृपार्जितमिति भावः।

रतिः। अज्जउत्त जइ एवं ता किंति तुम्हाणं सोअराणं वि परोप्परं एआरिसं वैरं। ।कामः। ।प्रिये। एकामिषप्रभ
वमेव सहोदराणामुच्चैर्जगति वैरमिति प्रसिद्धं। दृष्ट्वा निमित्तम् अभवत्तद्रूपांडवानां तीव्रं तथा हि भुवन
त्रयस्य विरोधः। ।सर्वमेवैतज्जगदस्माकं पितृपार्जितं। तदस्मास्विह तातवल्लभतया सर्वमेवैतदाक्रांतं तेषां वि
रंजनः प्रचारः। तेन ते पापाः पितरमस्मांश्चोन्मूल पितुमुद्यताः। ।रतिः। ।संतं पावं संतं पावं। अज्जउत्त किं एरिसे
पावे विद्देसमनकेणते हिं मारद्धं। अक्किं आउ कोवि मंतिदो। ।कामः। ।प्रिये अस्त्यत्र किंचिन्निगूढं बीजं। ।रतिः।
। ।ता किं एअं हाउ अदि। ।कामः। ।भवती स्त्री स्वभावात्कातरा ततस्तद्दारुणं कर्म पापीयसां उत्पाद्यते। ।रतिः।
। ।सज्जयं। अज्जउत्त के रिसं तं। ।कामः। ।प्रिये न भेतव्यं। शहताशानामाशामात्रमेवैतत्। अस्ति किलैषां किं
। ।सज्जयं। अज्जउत्त के रिसं तं। ।कामः। ।प्रिये न भेतव्यं। ... अस्ति किलैषां किं
वदंती। अत्रास्माकं कुले कालरात्रिकल्पा ब्रह्मविद्या नाम राक्षसी समुत्पत्स्यत इति। ।रतिः। ।सज्जयं। हद्धी हद्धी
कधं अम्हाणं कुले रक्खसित्ति वेवदि मे हिअअं। ।कामः। ।प्रिये किंवदंतीमात्रमेतत्। ।

रतिः। शांतं पापं शांतं पापं। आर्यपुत्र ईदृशं पापं विद्वेषमात्रकेनैव तैरारब्धं अस्ति उपायः कोपि मंत्रितो। निगूढं प्रच्छन्नं कारणं। रतिः।
आर्यपुत्र तर्हि किं नो हा घते कीदृशं तत्। किंवदंती लोकप्रसिद्धिः। न जातु त्वत इति नाममात्रं वासयति। विद्यातत्त्व साक्षात्कारः। राक्षसी क्रूरकर्मत्वा
त्। हा धिक् हा धिक्। कथं अस्माकं कुले राक्षसीति वेपते मे हृदयं। पुनराश्वासयति। किंवदंतीमात्रमेतदिति। ।

कामः। ।बाढं। सा खलु विवेकेन उपनिषद्देव्या सह अवश्यं अनादृतसंविन्नादात्म्यापन्ना ब्रह्माकारांतःकरणवृत्तिर्विद्या। ब्रह्माकारांतःकरणवृत्त्युपहि
तमनाहृद्वैतन्यं प्रबोधः। इदं त्वाहरागिणी युगलं विवेकेन विचारेण उपनिषद्व्यां शमदमादिभिः सहायैः जनयितव्यमिति निर्गलितोऽर्थः। ।रतिः।
आर्यपुत्र कथं पुनः आत्मनो विनाशकारिणी विद्या आत्मयोनिभिस्तैर्दुर्विनीतैः उत्पाद्यते। सहजेति। मलिनं वक्रं जाव्यं च जं तितेषां न वक्तव्य किं तु न
वस्य उत्पत्तिस्थानस्य आत्मनस्त्वनाशहेतुः उक्तमर्थमर्थांतरेण द्रढयति। धूमः जलधरपदवीं मेघस्थानं प्राप्य। स्वजनवनाग्निनाशं केवला रा
अनुपश्चात्स्वयं वनाशं प्रयाति। स्वयं वत्सहजमलिनवक्रजाव्यश्चेतिज्ञावः। अवलिप्तस्य गर्वितस्य। उत्पथप्रतिपन्नस्य कुमार्गप्रवृत्तस्य

॰ कामः बाढं। सा खलु विवेकेन उपनिषद्देव्यां प्रबोधचंद्रोदयेन भ्रात्रा सह जनितव्या। तत्र च वनेते सर्वे शमदमादयः प्रतिपन्नो यो
गः। ।रतिः। अज्जउत्त कधं पुण अप्पणो विणासकारिणीए विज्जाए उप्पत्तीए हिं दुव्विणीदेहिं तेहिं तत्त्वविकदि। ।कामः। प्रियेऽ
लद्वयप्रवृत्तानां पापकारिणां कुतः स्वपरप्रत्यवायगणना। पश्य। सहजमलिनवक्रभावभाजां भवति भवः प्रभवात्मनाशहेतुः।
जलधरपदवीमवाप्य धूमो ज्वलनविनाशमनुप्रयाति नाशं। ।नेपथ्ये। आः दुरात्मन् कथमस्मानेव पापकारि
ण इत्याक्षिपसि। ।ननु गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते। इति पौराणि
कीं गाथां पुराविद उदाहरंति। अनेन चास्माकं जनकेन अहंकारानुवर्तिना मनागत्यंतिः पितेव ता वद्धः मोहादिभिश्च स एव
बंधः सुदृढतां नीतः। ।कामः विलोक्य। प्रिये अयमस्माकं कुलज्येष्ठो यान्मत्या देव्या सह विवेकस्तत एवाभिवर्तते। य एषः।
रागादिभिः स्वरसवारिभिः निराक्रांतिर्निर्भर्त्स्यमान इव मानधनः दाशांगः। मत्या नितांतकलुषीकृतया शशांकः कांत्येव सांद्र
तुहिनांतरितो विभाति। ।

गाथापदं संदर्भं। जनकेन मनसा अहंकारानुवर्तिना अहंकाराध्यासयुक्तेनेत्यर्थः। रागादिभिरिति। य एष मत्या बुध्या सह विभाति।
कीदृशः। रागादिभिर्द्वेषमत्सरादिभिः आत्मा अपहृतकांतिः प्रनायस्यसता दशः। कथंभूतया मत्या। रागादिभिरिति। अत्रापि मत्यानि ३
तांतं कलुषीकृतया अत्यंतकलुषया। कथंभूतैः रागादिभिः स्वरसवारिभिः स्वेच्छाप्रवृत्तिभिः उत्स्वेद्यते निर्भर्त्स्यमानः तिरस्क्रियमाणः मा
न एव धनं यस्य एवंभूत इव। कया क इव। कांत्या शशांक इव चंद्र इव। कथंभूतः चंद्रः सांद्रेण तुहिनेन अंतरित आच्छादितः॥ ॥ ॥

तन्मुक्तमिति। एतेन विवेकोदयमात्रेण कामरत्योर्मंदता भावो दर्शितः॥ विष्कंभकः। पूर्ववनटसंदेपतत्प्रतिपदो कुष्टप्रवेशः॥ मतिः। ~~अ~~
आर्यपुत्र किं आत्मनो दोषं लोकः विजानाति। असावहंकारेति। तैः प्रसिद्धैर्मदादिभिः सोऽजगत्प्रभुः परब्रह्मदीनदशां अनादिरू
पोऽमवस्थां चिरकालमनीयत प्रापितः॥ कथंभूतैः मदादिभिः॥ अहंकारः परं ज्येष्ठो येषां तैः॥ पुनः कथंभूतैः दुरात्मभिः दुष्टैः किं कृ
त्वा पापशतैर्वासनाख्यैः पाशैर्निबध्य दृढं बध्वा। कथंभूतः जगत्प्रभुः चिदानंदमयः स्वप्रकाशसुखस्वरूपः निरंजनः निर्दोषः॥ ॥ ॥
मतिः। आर्यपुत्र यतो सो सहजानंदसुंदरसब्भावो नित्यप्रकाशः अस्फुरस्मकज त्रिभुवनप्रचारः परमेश्वरः श्रूयते। ता कथमेतेर्दु

त्तम्मुक्कमितास्माकं अवस्थाक्कमिति निक्रांतौ। विष्कंभकः। ततः प्रविशति राजा मतिश्च। ।राजा। ।विचिंत्य। प्रिये श्रुतं
त्वयास्य दुर्विनीतस्य कामबटोर्मदविस्फूर्जितं वचः। यदस्मानेव पापकारिण इत्याक्षिपति। ।मतिः। अज्जउत्त
किं अप्पणो दोसं लोओ विजाणादि। ।राजा। ।पश्य। असावहंकारपरैर्दुरात्मभिर्निबध्य तैः पापशतैर्मदादिभिः।
चिरं चिदानंदमयो निरंजनो जगत्प्रभुर्दीनदशामनीयत। ॥ स एते पुण्यकारिणो वयं तु तन्मुक्तये प्रवृत्ताः पापका
रिण इत्यहो निर्जितं दुरात्मभिः। ।मतिः। अज्जउत्त जदो सो सहजाणंदसुंदरसहावो णिच्चप्पआसो पहुरंतस अ आसो
त्तनिक्कअणप्पआरो परमेसरो सुणीअदि ता कधं एदेहिं दुव्विणीदेहिं बंधिअ महामोहसाअरे णिक्खित्तो। ।राजा।
प्रिये। सततधृतिरपि स्थैर्यशांतोऽप्यवाप्तमहोदयोऽप्यधिगतनयोऽप्यंतःस्वस्थोऽप्युदारितधीरपि। त्यजति सहजं धैर्यं स्त्री
भिः प्रतारितमानसः स्वमपि पदं मायासंगात् पुमानिह विस्मृतः॥ १६॥ ।

विदग्धैर्बद्धा महामोहसागरे निक्षिप्तः॥ सततधृतिरपीति। स्त्रीभिः प्रतारितमानसः पुमान् सहजं स्वाभाविकं मपि धैर्यं त्यजति। कीदृ
शोऽपि सततधृतिरपि निरंतरधैर्योऽपि। पुनः कथंभूतः स्थैर्यैः अतिशयेन शांतोऽपि। पुनः कथंभूतः अवाप्तः प्राप्तः महोदयो महदैश्व
र्यं येन स तथा॥ पुनः कथंभूतः अधिगतः प्राप्तः नयो नीतिर्येन स तथा॥ पुनः कथंभूतः अंतःस्वस्थोऽपि अव्यग्रचित्तोऽपि। पुनः कथं उदारित
धीरपि समयोचितबुद्धिरपि। ननु उद्दिष्ट दृष्टमित्याशंक्य च तत एव हृदयस्पृतमित्याह। यतः यस्मात् कारणात् मायासंगात् विद्यासंसर्गात् स्वं पु
मान्पुराणपुरुषः परमात्मा इदानीं स्वमपि विस्मृतः तस्मात् मायासंबंधात् सर्वं कं सर्वमुपपद्यत इति भावः॥ । ।

मायास्वरूपमविमानतो मतिरादिशति। मति॥ आर्यपुत्र नखलु कथं कारणेनयासदस्वरमेत्तिरस्कारः पन्मायया तथास्फुरन्महाग्रका
शमागरस्यापिदेवस्यापि अभिनवंमायास्वरूपं विशदयति। अविचारसिद्धा विचार्यमाणे असती अनिर्वचनीये तियावत्। वेषविलासिनीव
वेश्येव। असतो पिवस्तूना अविद्यमानानपि भावान्कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादीनुपदर्शयंती उपकल्पयंती परमपुरुषं वंचयति अन्यतां नय
ति। अन्यंयथावेश्या विद्यमानान्हावभावकटाक्षादीनुपदर्शयंती अन्यपुरुषं वंचयति इयंतु अविद्यमाना नित्याधिका। ।स्फटिकेति अ
न यामायया अनार्यया अनर्थहेतुभूतया नास्ताक्त्वयंदेवः परमात्मा कामपि अनिर्वचनीयां विकृतिं विकारं कर्तृत्वादिरूपंनी

मतिः। ।भगवन्नरेणं खलु कथं आरब्धेहाएसदस्वरस्सिणोतिरक्कारो। जं माआ एतधाफुरंतमहापआसस्सा अस्सदेवस्सा
विअहिदवो। ।राजा। ।प्रिये अविचारसिद्धेयं वेषविलासिनीव माया। असतोपि भावानुपदर्शयंती परमपुरुषं वंचयति।
स्वा। स्फटिकमणिवज्जात्स्वान्देवःअकाम मनार्ययावित्ततिमनयानीतो कामप्यसंगतविक्रियां। नखलु तदुपश्लेषाद स्वव
पे तिक्तिविमनाकुप्रभवति तथाप्येषागाढं विधावमधीरतां। १९। ।मति। ।किंपुणो कारणं जेणसा तधाउदारचरिदं दुविअद्धाप्पु
।राजा। ।नखलु प्रयोजनं कारणं वा विलोक्य मायाः प्रवर्तन्ते। स्वभावः खलु असौ स्त्रीपिशाचीनां। यथा। ।संमोहयंतिमदयंति
विडंबयंति निर्भर्त्सयंति रमयंति विषादयंति। एताः प्रविश्य हृदयं सदयं नराणां किंनाम वामनयना न समाचरंति। २०॥

त्स्येतः प्राप्तिलः। नहिंसन्तस्तथैवात्तित्यतआह। नखलु तदुपश्लेषात्संसर्गादस्य आत्मनः मनागपि ईषदपि रूचिः स्वरूपवका
रः अपैतिगच्छति। तत्रहेतुः गर्भविशेषणं। असंगविक्रय अस्संगावित विक्रयः। तत्रदृष्टांतः स्फटिकमणिवदिति। यथास्फटिकमणि
जपाकुसुमेनउपाधिनारक्ततां प्राप्नोति न तस्य स्वभावविकं चैत्यंगच्छति। तथा प्रकृते पीतिभावः तथास्फटिकमणिवदसंगत
विक्रियत्वेपि एषामायागाढं अत्यर्थंअधीरतां स्वभावचैलक्ष्यं विधातुं प्रभवति स्मर्यामिणोर्जपाकुसुममिवेति भावः। मतिः
किंपुनःकारणं येनयेनसा तथाउदारचरितं दुर्विदग्धा प्रतारयति। अकारणकमेव मायाप्रवर्तनेस्यादतआह। नखल्विति। संमोह
यंतीति। विडंबयंति अनुकुर्वंतीत्यर्थः। सदयं यथास्यात्तथा हृदयं प्रविश्येति क्रियाविशेषणं। वामनयना अधमदृष्टयस्त्व
र्थःशेषंसुबोधं॥ ॥ ८

।।मति।। ।आर्यपुत्र किंपुनस्तत्कारणं। ।राजा। ।एवमनयेति। स्वतनयं मनोरूपं पारमेश्वरे पदे आत्मचैतन्यव्यवहारप्रमाणेस्व
रूपेस्थानेनितांत प्रत्यासन्नतया तादात्म्यस्वरूपप्रत्यासत्या नवद्वाराणि पुराणि शरीररूपाणि रचयित्वा तेषु एकोपि परमा
त्मा विछिद्यैव पृथक्कृत्वैव बहुधा नानाप्रकारे निवेशितः स्थापितः तत्र व्यवहारविषयस्तु ततः अथोऽनंतरं तस्मिन्स्वचेष्टितंक
र्तृत्वादिधर्मं विदधाति। आसंजयति। तत्र दृष्टांतः मणाविव। यथा जपाकुसुमादिस्वधर्मं मणावारोपयति तथेत्यर्थः। ।

अत्तिवापरमपिकारणं। ।मतिः। ।भअवन्न किंपुणतं कारणं। ।राजा। ।एवमनयाऽदुराचारयाचिंतितं। यदहं
तावदजरयौवना वर्षीयसी अयं च पुराणपुरुषः स्वभावादेव विषयरसविमुखः ततः स्वतनयमेव पारमेश्वरे
पदे निवेशयामीति। तमेवं मातुरभिप्रायमासाद्य नितांतप्रत्यासन्नतया तद्रूपमिवापन्नेन मनसा नवद्वाराणि
पुराणि रचयित्वा एकोपि बहुधा तेषु विछिद्य विनिवेशितः। स्वचेष्टितमथो तस्मिन्विदधाति मणाविव। मतिः। ।वि
चित्रं। ।यादिशीमादापुत्तगोविदादिसो बहूजोदो। राजा। ।ततो बहुकारणवित्तस्यज्येष्ठपुत्रेण नभ्रापरिष्ठिकः। ।
जातोऽहंजनकोममैषजननी क्षेत्रंकलत्रं कुलं पुत्रामित्रमरातयो वसुबलं विद्यासुहृद्बांधवाः। चित्तस्पंदितकल्पना
मनुपतन्नविद्यान विद्यामयीं निद्रामेत्य विघूर्णितो बहुविधान्स्वप्नानिमान्पश्यति। २२। ।मतिः। ।भअवन्नएवंदीहम्म
रणिद्दाविअप्पबोहेमहेसरे कधं प्पबोह उप्पज्जित्तं विस्सदि। ।राजा। ।सत्वजंमनोमुखात्तिष्ठति। ।मतिः। ।भअवं तंकिंति
गुरुअरनक्कान्तरणामिद्देसेहरोत्तुज्झाकोत्तूदोसि। ।राजा। ।प्रियेसेर्ष्यप्रायेणयोषितां हृदयंभवति तेनसापराधमिवात्मा
नेशंके।

मतिः। ।विचित्र्यादृशी माता पुत्रकोपि तादृशएव जातः। इतोप्यवस्थांतरमाह। ततोसाविति। जातोहमिति। विद्धन्तान स्वरूपः।
अविद्यामयीं अविद्यारूपां निद्रां एत्य प्राप्य बहुविधाने कुरूपानिमान्स्वप्नान्पश्यति। किंभूतः विघूर्णितः स्वरूपमस्मरन्पुनः किंभू
तः। चित्तस्य मनसः स्पंदितं कल्पनां चेष्टा व्यापारअनुपतन्। अनुगच्छन्। इमान्कानित्याकांक्षायामाह। जातोहमित्यादिस्पष्टं। मतिः आर्यपु
त्र एवं दीर्घतरनिद्राविद्रावितप्रबोधे परमेश्वरे कथंप्रबोधोत्पत्तिर्भविष्यति। ।मतिः। ।आर्यपुत्र किमितिगुरुतरलज्जान्तरनमितशेखरस्त्वमासीः
भूतोसि। ।

रि मतिः। आर्यपुत्र अन्याः नाः स्त्रियाः स्वरसप्रवृत्तस्य धर्मार्थव्यापारप्रस्थितस्य वा नर्त्तहृदये स्थितं निर्वृतिं। इतियदुपनिषद्देव्याः मयासह संगमः स्यात्तदा प्रबोधोदयः आह इति योजना। कथंभूतायाउपनिषद्देव्याः मानिन्या अभिसत्कारसाध्यायाः पुनः कथंभूतायाः चिरविप्रयोगेण विरहेण तेन जनिता अत्यर्थ ईर्ष्या यया। आकुलायाः व्यग्रायाः उपनिषद्देव्याः संगमे हेतुमाह। शांत्यादेरनुकूलत्वादिति नावः। बहुकालपरिचयपात्रावेहत्वं तरमाह। भवता विषयान पास्य मुक्तेन तत्सा नित्ये तिष्ठेत्सदाज्ञाग्रस्त्व प्रभुस्तुतिधाम विरहादिति अयं भावः। बहुकालपरिचयपात्रावेन सर्वापां उपनिषदि सांनिध्यादिमनो विचारेण प्रवृत्तस्य बुद्धे विषयाव्यासंगात्प्रबुद्धा

मतिः। ।अजक्ष्य तं भ्रलातां अक्षि भाजासरस्य पक्षस्य बाधमन छद्मा आरभ्य छिदस्त्वा भवाले हिन्नस्य अये विहरंति। ।राजा। ।प्रिये। ।मानिन्याश्चिरविप्रयोगजनितासूयाकुलायाःन वेछां मा देव कूलनाउपनिषद्देव्यामपासंगमः। तत्सा वेद्धिषयानपास्य जवतो तिष्ठेन्मुहूर्त्तं ततो ज्ञानस्व प्रभुस्तुतिधाम विरहात्मा सात्प्रबोधोदयः। ।
।मतिः। ।अक्रत्वत्रजइएवं कुलपकुलो दिवंगंधिनिवद्धस्त्व बंधमुक्ते मोदि। तदा तारणे लिंबाणुबंधोए वेअ गउतोमे उविछु कुमेपिअं। ।राजा। ।प्रिये यद्येवं प्रसन्नास्मि सिद्धास्तर्हि न चिरमस्माकं मनोरथाः। ।तथाहि। ।बहवै को बहुधा विभज्य जगतामादिः प्रभुः शाश्वतः क्षिप्तो यैः पुरुषः पुरुष परमो मृत्योः पदं प्रापितः। तेषां ब्रह्मविदां विधाय विधिवत्प्राणांतिकं विध्याप्नायश्चित्तमिदं मया पुनरसौ ब्रह्मैकतां नीयते।२३। ।

दाविश्चिमानात्स्वात्प्रतानोत्पत्तिरिति। मतिः आर्यपुत्र यदि एवं कुलप्रभोर्दृढग्रंथिनिबंधनस्य बंधमोक्षो भवति तदा तया नित्य अनुबंधए व आर्यपुत्रो भवति निसुष्ठु मे प्रियं। बहवैक इति। तेषां सर्वोका ब्रह्मविदां ब्रह्मभेदकोपाधिकृतानां विषयात्म देव ब्रह्मसाक्षात्काररूपप्रायश्चित्तं किं मरणं नाशः इति यावत् तदेव प्रायश्चित्तं पापक्षालनकर्म विधिवत् विहितमयत्नपापमया असौ आत्मा ब्रह्मैकतां नीयते तेषां केषां। यैः जगतामादिः नायकः प्रभुः ईश्वरः सत्यः निरपेक्षः शाश्वतः नित्यः एवंभूतोऽपि पुरुषः परमात्मा पुरेषु शरीरेषु क्षिप्तः तन्मात्राभिमानात् हतः मृत्योः पदं मरणजननादि व्यवहारं प्रापितः। । १

प्रस्तुतविधानउक्तार्थसिद्धये। ।इति श्रीनाथविश्वनाथदीक्षितसूनुविरचितायां प्रबोधचंद्रोदयविवृतिचंद्रिकायां प्रथमोंऽकः। ।ततः प्रविशति दंभः इत्यादि पूर्वोक्तप्रकारेण सामात्येन मंत्रिसहितेन। अवहितैः सावधानैः प्रतिकर्त्तव्यः निराकरणीयः। निश्रेयसविघ्नार्थं मोहविघ्नार्थं यथानिर्दिष्टः यथोक्तः आदेशः आज्ञा। ।मदधिष्ठितैर्दांभिकैः। वेश्येति। धूर्तैः प्रतारकैः। दिवा दिवसे जगन्मनुष्यसमूहः इति अने

नैवत्वप्रस्तुतविधानाय सम्प्रमादान्प्रयोजयामः। ।इति निष्क्रांतौ। ।इति प्रबोधचंद्रोदये प्रथमोंकः। ।ततः प्रविशति दंभः। आदिष्टोऽस्मि महाराज महामोहेन यथा वत्स दंभ इति परिज्ञातं सामात्येन विवेकेन प्रबोधोदयाय प्रेषिता स्वतेन तेषु तेषु तीर्थेषु शमदमादयः स च अयमस्माकमुपस्थितः कुलक्षयो भवद्भिरवहितैः प्रतिकर्त्तव्यः। तत्र पृथिव्यां परमं मुक्तिक्षेत्रं वाराणसी नगरी तद्भवांस्तत्र गत्वा चतुर्णामप्याश्रमाणां निःश्रेयसविघ्नार्थं प्रयततामिति। तदिदानीं वशीकृता प्रायशो मया वाराणसी। संपादितश्च स्वामिनो यथानिर्दिष्ट आदेशः। ।तथाहि। ।मदधिष्ठितैरिदानीं। ।वेश्यावेश्मसु सीधुगंधिललनावक्त्रासवामोदितैर्नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचंद्राः क्षिपाः। सर्वज्ञा इति दीक्षिता इति चिरात्प्राप्ताग्निहोत्रा इति ब्रह्मज्ञा इति तापसा इति दिवा धूर्तैर्जगद्वंच्यते। ।विलोक्य अये कोऽयं पांथो भागीरथीमुत्तीर्य इत एवाभिवर्त्तते। तथा चायमेषः। ।उच्चलन्निवाभिमानेन ग्रसन्निव जगत्त्रयं। भर्त्सयन्निव वाग्जालैः प्रहसन्निव। ।तथा तर्कयामि नूनमयं दक्षिणराढप्रदेशादागतो भविष्यति। तदेवं तस्मादार्यस्याहंकारस्य वृत्तांतमनुसरिष्यामीति।

नप्रकारेण वंच्यते प्रतार्यते। इति किं सर्वज्ञा इत्यादि स्पष्टं। किं कृत्वा वेश्यावेश्मसु गणिकागृहेषु क्षिपाः रात्रयः नीत्वा। कथंभूताः क्षिपाः उन्निद्रः परिस्फुरणः चंद्रो यासु ताः कथंभूतैस्तैः। सीधुगंधिसुरागंधियुक्तं ललनावक्त्रं स्त्रीमुखं तदासवेन तन्मुखमदिरया मोदितैः संतुष्टैः। पुनः कथंभूतैः निर्भराः अतिशयितः मन्मथोत्सवः सुरतरसप्रीतिर्येषां तैस्तथा। तेरिति। यथैष इति। भर्त्सयन्नुपहसन्ग्रसन्नक्रोध्नयन् जगत्त्रयमित्यनुषंजनीयं। ।

नैवाश्रावीति। न पञ्चशिखः सूर्यत्वात् गुरोः आकरस्य मतं नैवाश्रावि नैव श्रुतं तौतातिकं नार्हं। सांख्यनैयायिकदर्शने दर्शनं शास्त्रं
न विदितं न ज्ञातं। अहो इत्याश्चर्ये। शालिकः प्रभाकरैकदेशी न जिरं तस्य वाचां तत्त्वं न ज्ञातं। वाचस्पतेर्न्यायशास्त्रीयनाप्यकर्णिका
कथा तजिरां तत्त्वं न ज्ञातं इदं किं तर्क्यमित्यर्थः। महोदधेः शेषप्रणीतस्य महाभाष्यस्य सूक्ष्ममपि नाधिगतं तत् दुरुक्तं किं मुकर्तं
र्य। महाव्रती महाव्रतं पाशुपतव्रतं तत्संबंधिनी महाव्रती पद्धतिः। न दृष्टा न दृष्टा। वस्तुविचारणा वेदांतन्यायसांख्यपातंजला
दिरूपा सूक्ष्मा दुराधिगमेत्यर्थः। एवं सति स्वस्थे वयं पंडिता न किंचित् ज्ञातव्यमस्तीति स्वस्थचित्तैः कथं स्थायते। व्यर्थाभिमा
नि नइत्यर्थः। विलोक्य। केवलवैदिका इति शेषः। अर्थावधारणमर्थनिश्चयः तद्विकराः तद्रहिताः॥ ॥

ततः प्रविशति अहंकारः। अहो मूर्खबहुलं जगत्। तथाहि। नैवाश्रावि गुरोर्मतं न विदितं तौतातितं दर्शनं तत्त्वज्ञानमहो न
शालिकगिरां वाचस्पतेः का कथा। सूक्तं नापि महोदधेरधिगतं माहाव्रती नेक्षिता सूक्ष्मा वस्तुविचारणा नृपशुभिः स्व
स्थैः कथं स्थीयते। विलोक्य। एते तावदर्थावधारणविकराः स्वाध्यायनमात्रनिरताः वेदविद्या वकाएव। पुनरन्यतो गत्वा
सिद्ध विलोक्य। एते च निद्रामात्रगृहीतयतिव्रताः कुंडितमुंडाः पंडितंमन्या वेदांतशास्त्रं व्याकुलयंति। विहस्य। अस्यद्वादिप्रमा
णविरुद्धार्थाभिधायिनः वेदांता यदि शास्त्राणि बौद्धैः किमपराध्यते। तदेतैर्वाङ्मात्रेणापि गुरुतरदुरितोदयाय। पुन
रन्यतो गत्वा। एते च शैवपाशुपतादयो दुरन्यस्ताः स पादशाल्वरताः पराकः पात्वडाः अमीषां संभाषणादपि नरा नरकं
प्रयांति। तदेते दर्शनपथात् दूरे परिहरणीयाः॥ ॥

पुनरन्यतो गत्वा। विलोक्येति। अनुषंजनीयं निद्रामात्रार्थं गृहीतं यतिव्रतं एकदंड संन्यासो यैः तेन तथा। अपंडिता अपि आत्मानं
पंडितं मन्यंते इति पंडितंमन्याः। प्रत्यक्षादीति। परोक्षप्रमाणविरुद्धार्थवादिनो बौद्धा यदि उपहास्यास्तर्हि प्रत्यक्षप्रमाणसिद्ध
प्रपंचस्य शुक्तिरजतसाम्यजल्पनविरुद्धार्थवादिनो वेदांताः सुतरामुपहास्याः इति भावः। वाङ्मात्रेणं संभाषणं। दुःखेन अन्य १०
त्तं अक्षपादस्य रताः। अवैशेषिकं न चरताः श्रोताः॥ ॥

नैर्थिकान्परिहसति। गंगातीरेति। अहो इत्याश्चर्ये दांभिकाः दंभयुक्ताः। धनिनां वित्तानि हरंति इत्यन्वयः। कथंभूताः गंगातीरतरंगैः शीतलाः
शिलाः तत्र विन्यस्ता स्थापिता ना स्वच्छकृष्णा दीप्यमाना कृष्णासनं तत्र संविष्टाः। पुनः कीदृशाः। कुशमुष्टिना मंडिताः शोभिताः महादंडः कुरु
जदंडो येषां तेन तथा। पुनः कीदृशाः। करंडैः धौतवस्त्रस्थापनाय नीतवंशपात्राणि तैः उज्ज्वलाः शोभमानाः। पुनः कीदृशाः। पर्यायेण त्रिः क्या
ग्रथितं अक्षस्तत्रवलयं रुद्राक्षादिमालारूपं तस्य प्रत्येकं बीजग्रहणे मणिग्रहणे व्यग्रा अंचला अंगुलयो येषां ते। त्रिदंडिव्यपदेशो
न त्रिदंडिनिषेवणं जीविनाः अन्य विरुद्धार्थाभिधायकत्वात् द्वैताद्वैतमार्गपरिनिष्ठा इति भावः॥ ॥

पुनरन्यतो गत्वा। एते च। गंगातीरतरंगशीतलशिलाविन्यस्तभास्वद्वृषीसंविष्टाः कुशमुष्टिमंडितमहादंडाः करंडोज्ज्वलाः।
पर्यायग्रथिताक्षसूत्रवलयप्रत्येकबीजग्रहव्यग्राग्रांगुलयो हरंति धनिनां वित्तान्यहो दांभिकाः॥ ४॥ पुनरन्यतो गत्वा। एते
च। त्रिदंडव्यपदेशजीविनो द्वैताद्वैतमार्गपरिनिष्ठा एव। अन्यतो गत्वा विलोक्य। अये कस्येदं द्वारोपांतनिखातातिप्रांशुवं
शकांडतांडवितधौतसितसूक्ष्मांबरसहस्रं। इतस्ततो विन्यस्तदर्भाजिनदृषदुपलसमित्स्रुवालेखज्वलज्जुशालं। अ
नवरतकुतप्याग्निधूमश्यामजितगगनमंडलममरसरितो नातिदूरे विभात्याश्रमपदं। ऊनमिदं कस्यापि गृहमेधि
नो गृहं भविष्यति। न वृथा नृणामस्माकमतिपवित्रमेतत् द्वित्रिदिवसनिवासाय स्थानं॥ ॥

इत्याश्रमं जिज्ञासते कस्येदमिति। अये अहो इत्यर्थो। इदं दृश्यमानममरसरितो भागीरथ्याः नातिदूरे निकटे कस्यचिदाश्रमपदं
विभाति शोभते। कीदृशं द्वारोपांते निखातं रवनितारोपितं अतिप्रांशु अत्युच्चं वंशकांडं तत्र तांडवितं नर्तितं धौतं क्षालितं अंबरसह
स्रं वस्त्रसमूहः यस्मिन् तत्तथा। पुनः कीदृक्। इतस्ततः विन्यस्तानि पतितानि दर्भाजिनदृषदुपलसमित्स्रुवालेखज्वलज्जुशाला
नि यज्ञपात्राणि यस्मिन् सा तत्र। पुनः कीदृक्। अनवरतं निरंतरं कुतायस्याग्नेः धूमो यस्मिन् तत्तथा। पुनः कीदृशं। धूमेन श्यामलितं श्या
मीकृतं गगनमंडलं येन तत्तथा। नूनमिति गृहमेधिनो गृहस्थस्य॥ ॥

वक्तोऽज्ञानं न्याह। दम्भ इति। मूर्द्धिद्वलोञ्छितेति। एष मूर्त्तो मूर्त्तिमान् दम्भ इव स्फुरति प्रकाशते। कीदृशः। मूर्द्धि दूर्वया लोलिके उञ्छिता
निर्विशिष्टा निजललाटादा नासिका यस्य स तथा। पुनः कथंभूतः। चूडाग्रकर्णकटिपालिषु विराजमाना दर्भाङ्कुरा यस्य स तथा। नविलिन्यादि
रूपतामित्यर्थः सुबोधं। गौडमिति। राष्ट्रं देशः। अनुत्तमं सर्वोत्तमं। तत्रापि गौडराष्ट्रेऽपि तत्र राढपुर्यां भूरिश्रेष्ठिकं इति नाम यस्य तत्।

प्रवेशं नाटयित्वा विलोक्य च। अये। मूर्द्धिद्वलोञ्छितललाटभुजोदरोरःकंठोष्ठपृष्ठचिबुकोरुकपोलजानुः। चूडाग्रकर्णकटि
पालिविराजमानदर्भाङ्कुरः स्फुरति मूर्त्त इवैष दम्भः। ७। भवतु उपसर्पाम्येनं। उपसृत्य। कल्याणं भवतां। दम्भः। हुंकारे
ण वारयति। प्रविश्य बटुः। ब्रह्मन् दूरत एव स्थीयतां। यतः पादौ प्रक्षाल्य एतदाश्रमपदं प्रवेष्टव्यं। अहंकारः। सक्रो
धं। आः कष्टं देशा ग्रामाः स्म। यत इह श्रोत्रियानतिथीनासनपाद्यादिभिरपि गृहिणो नोपतिष्ठन्ते। दम्भः। हस्तसंज्ञया समा
श्वासयति। बटुः। एवमाराध्यपादाः प्रतिपादयन्ति। दूरदेशादागतस्यार्यस्य कुलशीलादिकं न सम्यगस्माभिर्विदितं ते
न नार्चितः। अहंकारः। कथमस्माकमपि कुलशीलादिकमिदानीं परीक्षितव्यं। श्रूयतां। गौडं राष्ट्रमनुत्तमं निरुपमा तत्रा
पि राढापुरी भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता। तत्पुत्राश्च महाकुलान्न विदिताः कस्यात्र तेषामपि प्रज्ञाशीलवि
वेकधैर्यविनयाचारैरहं चोत्तमः। ८। दम्भः। बटुमुपपश्यति। बटुः। ताम्रघटीं गृहीत्वा भगवन् पादशौचं विधीयतां। अहंकारः
कथमत्र को विरोधः। एवं क्रियते। तथोपसर्पति। दम्भः। दन्तानपि पाण्डुरेणावलक्ष्यतां। कदाचिद्वातोद्धूताः प्रस्वेदकणिकाः
प्रसवन्ति। अहंकारः। अहो अपूर्वमिदं ब्राह्मण्यं। बटुः। ब्रह्मन्नेवमेतत्। अस्पृष्टचरणा यस्य चूडामणिमरीचिभिः
नीराजयन्ति भूपालाः पादपीठान्तभूतलं। ९।

श्रेष्ठिक नाम एतादृशं धाम गृहं अस्ति तत्र विशेषः। तत्र गृहे नः अस्माकं उत्तमः उत्कृष्टः पिता अस्ति विशेषः। तत्पुत्राश्च महाकुलाः अत्र जगति क
स्य न विदिताः अपि तु सर्वस्यैव विदिताः। तेषां अपि प्रज्ञाशीलविवेकधैर्यविनयाचारैः उत्तमोऽहं न तु उत्तमश्च तथा चाहं ततोऽपि जगत्त्रितयेऽपीत्याशयः।
दम्भः। इत्यादि ब्रह्मन्नेवमेवैतदिति सुगमं। अस्पृष्टचरणाः चरणस्पर्शरहिता भूपाला राजानः चूडामणिमरीचिभिः पादपीठस्य अन्तः भूतलं नीरा ११
जयन्ति। अयं भावः। यस्य राजानोऽपि मुकुटरत्नकिरणैः पादपीठमस्पृष्ट्वापि नीराजयन्ति तस्याग्रे भवन्तः के वराका इति। अनेन दाम्भिकानां
राजमानपुरःसरमेव ब्राह्मण्यं नाचारप्रधानमिति सूचितं॥ ॥

अहंकार इत्यादि मूर्खैर्वैत्यं तं स्पष्टं। नास्माकमिति। जननी माता उज्ज्वलकुलजा न तु स्वच्छकुला नच ऊढा परिणीता। ताताधिकः पितुरपेक्षया अधिकः।
उत्तमैरुत्तमैर्नित्यं संबंधाभावे हेतुः। इत्यादि स्फुटत्वात् पित्रपेक्षया श्रेष्ठसंबंधास्त्वयमुत्कृष्ट इति भावः। आधिक्यं दर्शयति। अस्मच्छा
लकस्य मित्रं तस्य मातुलस्य दुहिता सा मिथ्याभिशप्ता ततः परंपरासंबंधादति प्रेयस्यपि अतिप्रेमास्पदभूतापि स्वगृहिणी प्रोज्झिता दूरे
त्यक्ता। एतेन स्वोत्कर्षाचारादिकमधिकाचार इति दर्शितं। सदनमिति। अहं ब्रह्मणा गोमयेन अम्भसा च लेपाभ्यां परिमार्जित। परिष्कृतः निजः

अहंकारः स्वगतं। अये दम्भाभोगोऽयं देशः। प्रकाशं। भवतु। अस्मिन्नासने उपविशामि। तथा कर्तुमिच्छति। बटुः। मैवं मैवं। नारा
यणपादानामासनं अन्यैराक्रम्यते। अहंकारः। आः पाप अस्माभिरपि दक्षिणराढप्रसिद्धविशुद्धाभिजनैरिदमासनमनाक्र
मणीयं। शृणु रे मूर्ख। नास्माकं जननी तथोज्ज्वलकुला सच्छ्रोत्रियाणां पुनर्व्यूढा कन्यका खलु मया तेनास्मि ताताधि
कः। अस्मच्छ्यालकमित्रमातुलसुता मिथ्याभिशप्ता यतस्तत्संबंधवशान्मया स्वगृहिणी प्रेयस्यपि प्रोज्झिता। दम्भः। ब्रह्म
न् यद्यप्येवं तथाप्यविदितास्मद्वृत्तान्तो भवान्। तथाहि। सदनमुपगतोऽहं पूर्वमम्भोजयोनेः सपदि मुनिभिरुच्चैरासनेषू
ज्झितेषु। सशपथमनुनीय ब्रह्मणा गोमयाम्भःपरिमृजितनिजोरौ वासमुत्संवेशितोऽस्मि। १०। अहंकारः। अहो दाम्भिकस्य
ब्राह्मणस्यातिकिः। विचिंत्य। अथवा दम्भस्य वस्त्र। प्रकाशं। सक्रोधं। आः किमेवं गर्वायसे। अरे क एष वासवः कथ
य को वा पद्मोद्भवो वद प्रभवन्त्यमी जगति कामुकाणामपि। अवेहि तपसो बलं मम पुरन्दराणां शतं शतं च परमेष्ठिनां पत
न्तु वा मुनीनां शतं। ११। दम्भः। विलोक्य सानन्दं। अये। आर्यः पितामहोऽस्माकं अहंकारः। आर्य दम्भो लोभात्मजोऽभिवादयते।

स्वीयः ऊरुः अंकः तस्मिन् संवेशितः उपवेशितः। कथंभूतः अहं। अंभोजयोनेः ब्रह्मणः सदनं गृहं उपगतः के सति मुनिषु आसनेषु सपदि तत्काले मुनिभिः
आसनेषु उच्चैर्यथा भवति तथा उज्झितेषु सत्सु। किं कृत्वा उपवेशितः। सशपथं यथा भवति तथा अनुनीय मानयित्वा। एतेन ब्रह्मलोकेऽपि
गमोऽहं ब्रह्मणो मान्य इति भावः। महत्त्वमप्युपदर्शितं। अहंकार इत्यादि किमेवं गर्वायसे इत्यन्तं सुबोधं। सर्वं मत्तपोबलसिद्धमेव नान्यत्किंचिदन्य
थालीति प्रतिपादयन्नहंकार आह। अरे इति। अरे वासवः इन्द्रः क इत्यन्न कोऽपि न पद्मोद्भवो ब्रह्मा कः। कथय मुखाणामपि जगति प्रभवन्ति
उत्पन्नास्ताभ्रूपाकाः। कथं इदं तत्त्वं मम तपसो बलं अवेहि। पुरंदराणां इंद्राणां शतं परमेष्ठिनां ब्रह्मणां मुनीनां शतं पततु गच्छतु। सर्वं मत्तपसा
जविष्यतीति भावः। एतत्सर्वमहंकारोद्भवमिति दर्शितं॥ ॥

दंभ इत्यादि प्रसादः कृत इत्यंतं स्पष्टं॥
अहंकारः। वत्स आयुष्मान् भव। बालः खल्वसि मया द्वापरांते दृष्टः। संप्रति कालविप्रकर्षाद्वार्द्धक्यग्रस्ततया च न सम्यक् प्रत्यभिजानामि।
अथ वत्स कुमारस्यानृतस्य कुशलं। दंभः। अथ किं सोप्यत्रैव वर्त्तते। न हि तेन विना मुहूर्त्तमपि अहं भवामि। अहंकारः। अथ त
व मातापितरौ तृष्णालोभौ क्व चैव। दंभः। अथ किं तावपि राज्ञो महामोहस्याज्ञया अत्रैव वर्त्तेते। किं च तत्कनिष्ठ शरीर एवास्मि। अ
नस्तावतिशयेन दृढीभावमापन्न पदार्थौ। अहंकारः। भवादृशां कुलप्रसूतानां युक्तमेवैतत्। दंभः। आर्यमिश्रैः केन प्र
योजनेन अत्र प्रसादः कृतः। अहंकारः। वत्स मया महामोहस्य विवेकसकाशादत्याहितं श्रुतं। तेन तद्वृत्तांतं प्रष्टुमागतो
स्मि। दंभः। तर्हि स्वागतमेवार्यस्य। यतो महाराजमहामोहस्य पीडलोकाद्धागमः श्रूयते। अस्ति च किंवदंती। यद्देवेन वाण
रसी राजधानी निरूपितेति। अहंकारः। पुनः किं महामोहस्यावस्थानेकारणं। आर्य ननु विवेकोपरोध एव। तथाहि। वि
द्याप्रबोधोदयजन्मभूमी वाराणसी ब्रह्मपुरी निरत्यया। अतः कुलोच्छेदविधिं विधित्सुर्निवेष्टुमत्रेच्छति नित्यमेव सः। अ
हंकारः। सत्यं। यद्येवं अशक्यप्रतीकार एवायमर्थः। यतः। परमविदुषां पदं नराणां पुरविजयी करुणाविधेयचेताः।
कथयति भगवानिहांतकाले भवभयकातरतारकं प्रबोधं। दंभः। सत्यमेतत्तथापि नैतत्कामक्रोधाभिभूतानां संभा
व्यते। तथाहि कदाहरंति। यस्य हस्तौ च पादौ च मनश्चैव सुसंयतं। विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते। नेपथ्ये। भो
भो पौराः एष खलु संप्राप्तो देवो महामोहः। तेन। निस्यंदैश्चंदनानां स्फटिकमणिशिलावेदिकाः संसिच्यंतां मोच्यंतां यंत्रमार्गाः
प्रस्तरंतु परितो वारिधारा गृहेषु। उच्छ्रीयंतां समंतात्स्फुरदुरुमणयः श्रेणयस्तोरणानां धूप्यंतां सौधमूर्द्धस्वमरपतिधनुर्धामवि
द्युत्पताकाः॥ ।
राज्ञि आगते यत्कर्त्तव्यं तदाह। तेन निस्यंदैरिति। स्फटिकमणिघटिताः शिलावेदिका याः पाषाणचत्वराः चंदनानां निस्यंदैः द्रवैः
संसिच्यंतां यंत्रमार्गाः जलयंत्रद्वाराणि मोच्यंतां उद्घाट्यंतां। वारिधाराः जलधारा गृहेषु परितः इतस्ततः प्रस्तरंतु समंतात्सर्वतः स्फुरंतः
दीप्यमानाः उरवो महांतः मणयो यासु ताः एवंभूताः तोरणानां श्रेणयः पंक्तयः उच्छ्रीयंतां ऊर्ध्वं बध्यंतां सौधमूर्द्धसु प्रासादमस्तके १२
षु अमरपतिधनुः तस्य धामरूपं तद्वद्विचित्रा नानारूपा विद्युत्पताकाः धूप्यंतां। एतेनेयं कर्त्तव्यता मोहप्रवेशनिर्देश इति सूचितं॥ ॥

उ

प्रत्यासन्नमनिकरवर्त्ती प्रत्युद्गमनेन सम्यग्गमनेन। विभवतः विभवेन सार्वविभक्तिकस्तसिरित्युक्तत्वात्। महामोहः प्रविशति। परि
वारश्च सेवकवर्गश्चेति योजना। राजा इत्यादि। निरंकुशाः निरर्गलाः जडधियो मूर्खाः। तदेव दर्शयति। आत्मास्तीति। इदं च आकाशतरोः
प्रसूनात् गगनवृक्षकुसुमात् स्वादुतः सुरस्य फलस्य प्रत्युत्पत्तौ आशा। इयं कायदात्मा देहव्यतिरिक्तस्त्रीनिर्भिन्नस्वरूप इ
ति यावत्। स पुनर्लोकांतरितः लोकांतरफलानां स्वर्गादिसुखानां भोक्ता इति। इदं चेति। केवलं स्वकल्पना विनिर्मिता एव न वास्त
वा इत्यर्थः। एतादृशपदार्थावष्टंभेन अंगीकारेण दुर्विदग्धैः अल्पबुद्धिभिः। यन्नास्त्येवेति। बहुभिर्वाचालैः केवलं कोलाहलं कर्तृभि

दंभः। आर्य प्रत्यासन्नोयं महाराजः। तत्प्रत्युद्गमनेन संभाव्यतामार्येण। अहंकारः। एवं भवतु। निष्क्रांतौ प्रवेशकः॥
ततः प्रविशति महामोहः विभवतश्च परिवारः। राजा। विहस्य। अहो निरंकुशा जडधियः। आत्मास्ति देहव्यतिरिक्तमूर्ति
र्भोक्ता च लोकांतरितः फलानां। आशेयमाकाशतरोः प्रसूनात् प्रथीयसः स्वादुफलानि भोक्तुं। इदं च स्वकपोलकल्प
नाविनिर्मितपदार्थावष्टंभेन जगदेवं दुर्विदग्धैर्वंच्यते। तथाहि। यन्नास्त्येव तदस्ति वस्त्विति मृषा जल्पद्भिरेवास्तिकै
र्वाचालैर्बहुभिः स सत्यवचसो नित्या हता नास्तिकाः। हंहो पश्यत तत्त्वतो यदि पुनर्भिन्नो दितो वर्ष्मणो दृष्टः किं परि
णामरूपितचितेर्जीवः पृथक्कैरपि। अपि च। न केवलं जगदात्मैव तावदमीभिर्वंच्यते।

रास्तिकैर्वेदवादिभिर्नास्तिका वेदबाह्या निंद्याः कृताः। कीदृशा नास्तिकाः सत्यवचसः। कीदृशैरास्तिकैः। यन्नास्त्येव सर्वथा अप्रा
माणिकं शरीराद्व्यतिरिक्तात्मस्वरूपं तदस्ति प्रमाणसिद्धं इति जल्पद्भिः यद्वक्तुमप्रमाणसिद्धं शरीरादि तन्मृषा मिथ्या इति जल्पद्भिः
अतो असत्यवचनैरिति भावः। तत्र स्वमते युक्तिं प्रदर्शयन् मध्यस्थान् संबोधयति। हंहो इति। एतदव्ययं। आश्चर्ये। भो मध्यस्थाः छि
न्नात्कर्शितात् अतः अस्मात् वर्ष्मणः शरीरात् पृथक् भिन्नः जीवः कैरपि दृष्टः इति तत्त्वतः पश्यत विचारयत। ननु अचेतनैः पृथि
व्यादिभिरारब्धे शरीरे चैतन्यं कुत इत्याशंक्याह। परिणामेन रूपांतरापत्त्या निरूपिता चितिश्चैतन्यं यस्य एतादृक् शरीरविशेषणं॥ ॥

तुल्यत्वेवपुषामिति। मुखाद्यवयवैर्हस्तपादादिभिर्वपुषां शरीराणां तुल्ये साम्ये वर्णक्रमः वर्णानां भेदेन धर्मनिरूपणं रूपः। कीदृशः। न
कथंचित्फलित्ति सहृमिति भावः॥ इयंयोषास्त्री वस्तुधनं परस्य अन्यस्य इति भेदं न विद्मः। आस्तिकैः क्रियमाणे भेदे यद्यतुप्रारेव बुध्यपक
स्थितं हेतुमाह। निःपौरुषाः सामर्थ्यरहिताः॥ बत इति खेदे। कार्याविचारणा इदं कार्यमिदं न कार्यं इति विचारं कुर्वते। केषु कार्येषु इत्यु
पेक्षायामाह। हिंसायां अथवा स्त्रीणां परस्य गमने परस्त्रीसंग इत्यर्थः। परस्वग्रहणे परस्वापहारे इत्यर्थः॥ अयं भावः। अर्थकामावे
व पुरुषार्थौ न धर्ममोक्षयोः अत्यन्तगोचरत्वादाह। पुरुषार्थत्वं। एवं च परस्वग्रहणपरस्त्रीसंगमानां पुरुषार्थसाधनानामस्माभि

।तथाहि। ।तुल्यत्वेवपुषांमुखाद्यवयवैर्वर्णक्रमः कीदृशो योषेयं स्वकृतापरस्य भवतु भेदं न विद्मो वयं। हिंसायामथवापरे
स्य च गमने स्त्रीणां परस्वंग्रहे कार्याकार्यविचारणा बत ततो निःपौरुषाः कुर्वते। ।विचिंत्य। सर्वथा लोकायतमेव शास्त्रं यत्र
प्रत्यक्षमेव प्रमाणं पृथिव्यप्तेजोवायवस्तत्त्वानि अर्थकामौ च पुरुषार्थौ। भूतान्येव चेतयंति नास्ति परलोकः मृत्युरेवापवर्गः।
तदेतदस्मदभिप्रायानुबंधिना वाचस्पतिना प्रणीय चार्वाकाय समर्पितं। तेन शिष्योपशिष्यद्वारेणास्मिंल्लोके बहुली
कृतं तत्। ।ततः प्रविशति चार्वाकः शिष्यश्च। ।चार्वाकः। ।वत्स जानासि दंडनीतिरेव विद्या। अत्रैव वार्तान्तर्भवति। धूर्तप्रला
पस्त्रयी। पश्य। ।स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्वनां। ततो दावाग्निदग्धानां फलं स्याद्भूरि भूरुहां।१८॥

क्रियमाणत्वाद्धयं कृतार्थाः। ते उत्तद्धिक्कारा वंचिता इत्यर्थः॥ सत्यावंस्तुतिपूर्वकं। लोकायतमेव तत्त्वानि स्वरूपानीत्यर्थः॥ तान्येव परि
णतानीति शेषः। चेतयंते ह्यानं जनयंति। परलोकः स्वर्गादिः अपवर्गो मोक्षः॥ अनुबंधिना अनुसारिणा दंडनीतिः आन्वीक्षिकी राजनी
तिप्रतिपादकं शास्त्रमिति यावत्। अत्रैव दंडनीत्यामेव वार्ता राजसेवानिरूपकं शास्त्रमेवास्यापि अर्थसाधनत्वसाम्यात् धूर्तप्रला
पः प्रतारकजल्पितमित्यर्थः॥ त्रयी वेदत्रयी वेदार्थस्य प्रामाण्यं दर्शयति। पश्य स्वर्ग इति। कर्ता रीकृत्विजः क्रिया होमादिद्रव्यपाक
यं पुरोडाशादिरूपं यत्तद्विनाशेपि यज्वनां यागकर्तृणां यदि स्वर्गस्तर्हि तत्कारणकार्योत्पत्तिस्वीकारात्। ततो दावाग्निदग्धानां भू
रुहां वृक्षाणां भूरि बहुलं फलं स्यात्॥ ।। १३

मृतानामिति। निर्वाणस्य नष्टस्य स्नेहस्तैलादिः। शिष्यः। आचार्य यदि एष एव पुरुषार्थः यत्खाद्यते पीयते तत्किमिति एतैस्तीर्थिकैः
संसारसुखं परिहृत्य आत्मा घोरतरैः पराकसांतपनषष्ठकालत्रयरात्रिभिः खेदैः खेद्यते। क्वालिंगनमिति। भुजाभ्यां निपीडितं यत्
बाहुमूलं तेन भग्नावनतौ उन्नतौ स्तनौ तास्यां मनोहरं। आयताक्ष्याः विस्तृतनेत्रायाः आलिंगनं क्व कुधियां दुर्बुद्धीनां एष दृश्यमानो भि
क्षादिभिर्देहोपशोषविधिः क्व। द्वौ क्वशब्दौ महदंतरं सूचयतः।

अपि च। मृतानामपि जंतूनां श्राद्धं चेत्तृप्तिकारकं। निर्वाणस्यापि दीपस्य स्नेहः संवर्द्धयेच्छिखां।२०। शिष्यः। ।आचरिअ जइ ए
सो ज्जेव्व पुरिसत्थो जं खज्जइ पिज्जइ ता किं एदेहिं तित्थिएहिं संसारसुक्खं परिहरिअ अप्पा घोरेहिं पराकसंतपण
छट्ठकालप्पहुदीहिं दुःक्खेहिं खेदिज्जदि। ।चार्वाकः। ।धूर्तप्रणीतागमवंचितानामाशामोदकैस्तृप्तिरेषां। पश्य। क्वा
लिंगनं भुजनिपीडितबाहुमूलभग्नोन्नतस्तनमनोहरमायताक्ष्याः। भिक्षोपवासनियमार्कमरीचिदाहदेहोपशोषण
विधिः कुधियां क्व चैषः।२१। ।शिष्यः। आचार्य जं एवं खु तित्थिआ आलवंदि जं दुक्खमिस्सिदं संसारसोक्खं परिह
रणिज्जंति। ।चार्वाकः। ।विहस्य। अहो दुर्बुद्धिविलसितं पशूनां। ।त्याज्यं सुखं विषयसंगमजन्म पुंसां दुःखोपसृष्ट
मिति मूर्खविचारणैषा। व्रीहीन्जिहासति सितोत्तमतंडुलाढ्यान् को नाम भोस्तुषकणोपहितान्हितार्थी।२२। ।मह
मोहः। ।अये चिरेण खलु प्रमाणवंति वाक्यानि कर्णसुखमुपजनयंति। विलोक्य। सानंदं। हंत प्रियसुहृन्मे चार्वाकः।
चार्वाक विजयतां महाराज महामोहः। उपसृत्य जयतु महाराजः। एष चार्वाकः प्रणमति। महामोहः। ।चार्वाक स्वा
गतं इहोपविश्यतां।-

शिष्यः। ।एवं खलु तीर्थिका आलपंति यद्दुःखमिश्रितं संसारसौख्यं परिहरणीयमिति। त्याज्यं सुखमिति। दुःखोपसंसृष्टं दुःखसं
वलितं विषयसंगमजातं सुखं त्याज्यं। एषा पुंसां मूर्खविचारणा। उक्तमर्थमर्थांतरेण द्रढयति। भोः शिष्यसंबोधनं। कः हितार्थी
सितायेत्तमाः समीचीनाः तंडुलास्तैराढ्यान्संपन्नान् व्रीहीन् तुषकणयुक्तान् जिहासति। न कोपीत्यर्थः॥ यस्य जिहास्यति समूर्खः। त
थागतेइतिभावः। ।।

अथकलेरित्यंतंसुबोधं।नंदकल्याणंअव्याहतंनिर्विघ्नंविवर्त्तितंसंपादितं।कर्त्तव्यस्यकार्यस्यशेषाः अवशिष्टभागोयेनसतथा।कृतकार्यस्यसेवकस्यप्रभुदर्शनं अतिश्लाघ्यं इत्याह।आज्ञामवाप्येति।प्रभोर्महतीमाज्ञामवाप्यप्राप्यद्विषतांशत्रूणांनिपातान्नाशात्ताप्रमाणंनिर्वर्त्यसंपाद्यसंपादितकालेनअनुरूपप्रसादःसुमानुषैःप्रमोदंबद्धानंदंयथाभवतितथाअनुमोदितंतस्मात्दर्शनंयस्यएतादृशःसन्यःप्रभुचरणंस्वामिनांपदांबुरुहंनमस्यतिसधन्यः।तस्मादयंकृतार्थःत्वांनमस्यतीतिभावः।

चार्वाकःउपविश्य।देवकलेःसाष्टांगपातःप्रणामः। ।महामोहः।अथकलेर्नंदमव्याहतं। ।चार्वाकः। ।देवस्यप्रसादात्सर्वत्रनंदं। ।केलिः। ।निर्वर्त्तितकर्त्तव्यशेषःदेवपादमूलंद्रष्टुमिच्छति।यतः। ।आज्ञामवाप्यमहतींद्विषतांनिपातान्निर्वर्त्यतांसपदिलब्धगुरुप्रसादाः।उच्चैःप्रमोदमनुमोदितदर्शनःसन्धन्योनमस्यतिपदांबुरुहंप्रभूणां।२४। [illegible] महामोहः। ।अथतत्रकियत्संपन्नं। ।चार्वाकः। ।देव।व्यतीतवेदार्थपथःप्रथीयसीयथेष्टचेष्टांगमितोमहाजनः।तत्रैवहेतुर्नकलिर्नचाप्यहंप्रभुप्रसादोहितनोतिपौरुषं।२५।तत्रोत्तरापथिकाःपाश्चात्याश्चत्रयीमेवत्याजिताःशमदमादीनांकेवचिंता।अन्यत्रापिप्रायशोजीविकामात्रेवत्रयी। ।यथाहाचार्यः। ।अग्निहोत्रंत्रयोवेदास्त्रिदंडंभस्मगुंठनं।बुद्धिपौरुषहीनानांजीविकेतिबृहस्पतिः।२६।तेनकुरुक्षेत्रादिषुतावद्देवेनस्वप्नेपिविद्याप्रबोधयोःसत्त्वनिर्नशंकनीया। ।महामोहः। ।साधुकृतंसंपादितंमहत्अद्भुतंसार्थव्यथाकृतं। ।चार्वाकः। ।अन्यच्चिद्विज्ञाप्यमस्ति। ।महामोहः। ।किंतत्। ।चार्वाकः। ।अस्तिविष्णुभक्तिर्नाममहाप्रभावायोगिनी।सातुकलिनायद्यपिविरलतरप्रचाराकृतातथापितदनुगृहीतान्वयमालोकयितुमपिप्रभवामःतत्रदेवेनावधातव्यमिति।

व्यतीतेति।महाजनोब्राह्मणादिजनःयथेष्टचेष्टांअगम्यागमनापेयपानादिकर्त्तव्यतांगमितः।कथंभूतःमहाजनः।व्यतीतअतिक्रांतवेदार्थपथःसंध्यास्नानादिरूपोयेनसतथा।अत्रचमोहिकलेर्नुत्वंदर्शयन्नाह।तत्रेति।स्पष्टं।त्रयीमेवत्याजिताःवेदत्रयमेवब्राह्मणाःकृताइत्यर्थः।आचार्यःबृहस्पतिःआह [illegible] होत्रमितित्रिदंडंत्रिदंडसंन्यासःभस्मगुंठनंत्रिपुंड्रधारणंजीविकाजीवनहेतुः।कुरुक्षेत्रादिष्वित्यत्रआदिग्रहणात्बदरिकाश्रमादिः।अवधातव्यंसावधानेनभवितव्यं। । ४

आत्मगतंमनस्येवनबहिरित्यर्थः।अनवहितेनअसावधानेन।विपाकेति।विपाकदारुणःपरिणामेदुःखदइत्यर्थः।अरुंतुदःमर्मस्पर्शकः।अर्थोमहामोहः। ।सभयंआत्मगतं।आःप्रसिद्धमहाप्रभावासायोगिनीस्वभावान्मद्द्वेषिणीवास्माकंदुरुच्छेद्याच।जयतुप्रकाशंभद्रअजमनयाशंकयाकामक्रोधादिषुप्रतिपक्षेषुसत्सुअजेयमृदंगप्रतिपत्तिप्रणिधीयस्याःपरिपोषिण्याःगुणानामवहितेनभवितव्यं। ।यतःविपाकदारुणोराज्ञांरिपुरल्पोप्यरुंतुदः।उद्वेजयतितीक्ष्णोपिचरणंकंटकांकुरः। ।कःकोत्रभोः।प्रविश्यदौवारिकः।आज्ञापयतुदेवः।महामोहः।भोभोःसत्संगआदिश्यतांकामक्रोधलोभमदमानमात्सर्यादयः।यथायोगिनीविष्णुभक्तिर्नवद्भिरवहितैःप्रतिहंतव्येति। ।दौवारिकः। ।यदाज्ञापयतिदेवइतिनिष्क्रांतः।ततःप्रविशतिपत्रहस्तःपुरुषः।हंगोउत्कलदेशादागतोस्मि।अस्तितत्रसागरतीरेपुरुषोत्तमसंज्ञिकंदेवदायतनं।तस्मिन्मदमानौदृष्टौकेहिंमहाराजस्यआसंपृष्टिक्षिप्तदोस्मि।विलोक्य।एषवाराणस्यांएदंराजकुलंतावत्प्रविशामि।प्रविश्य।एषोत्रद्वारलकोचार्वाकेणसहकिंपिमंत्रयंतिष्ठति।तदुपसर्पामिएनं।उपसृत्य।जयदुजयदुभट्टकएदंपत्तंनिरूविअप्पेदुमहाभट्टक।। ।महामोहः। ।पत्रंगृहीत्वाकुतोभवान्पुरुषः। ।हंगोभट्टकेणंपुलिसोत्तमादोमदमाणह्मलकासिदेहिंसकासादागदोस्मि। ।महामोहः। ।स्वगतं।कार्यमत्याहितंनविष्यति।प्रकाशं।चार्वाकगच्छकर्त्तव्येष्ववहितेनभवितव्यं। ।चार्वाकः। यदाज्ञापयतिदेव। ।इतिनिष्क्रांतः। ।महामोहः। ।पत्रंवाचयति।स्वस्तिश्रीवाराणस्यांमहाराजाधिराजपरमेश्वरमहामोहचरणान्पुरुषोत्तमायतनान्मदमानौसाष्टांगपातंप्रणम्यविज्ञापयतःयथान्नदमव्याहतं।अन्यदेवीशांतिर्मात्राश्रद्धयासहविवेकस्यदौत्यमापन्नाविवेकसंगमायदेवीमुपनिषदमहर्निशंप्रबोधयति।अपिच।कामसहचरोधर्मोपिवैराग्यादिरूपजनैर्वावचन्यते।यतःकामाद्विष्ठिधकृतश्चिन्निस्मरति।तदेतत्श्रुत्वादेवःप्रमाणमिति। ।महामोहः। ।सक्रोधं।आः।किमेवमतिमुग्धायाःशांतेरपिबिभ्यति।कामादिषुप्रतिपक्षेषुकुतोस्याःसंभवः।

तरेणादहयति।उद्वेजयतीति।उद्वेगंजनयत्युत्पादयतीत्यर्थः।कःकोत्रभोरित्यादि।ततःप्रविशतिपत्रहस्तःपुरुषइत्यंतंसुबोधं।पुरुषःप्राकृतः।उत्कलदेशादागतोस्मि।अस्तितत्रसागरतीरेपुरुषोत्तमसंज्ञितंदेवतायतनं।तस्मिन्मदमानाभ्यांमहारकाभ्यांमहाराजसकाशंप्रेषितोस्मि।एषावाराणसीइदंराजकुलंयावत्प्रविशामि।एषमहारकाश्चार्वाकेणसार्द्धंकिमपिमंत्रंमंत्रयन्तिष्ठति।तदुपसर्पाम्येनं।जयतुजयतुमहारकाः।इदंपत्रंनिरूप्यमेदत्तंमहारकः।पुरुषः।अहंपुरुषोत्तमात्महारकेणपुरुषोत्तमात्मदमानयोमहारकात्सिधादागतोस्मि।महामोहः।स्वगतमित्यादिमहामोहःक्रोधमित्यंतंस्फुटार्थं।अतिमुग्धाःअतिमूढा। ।

वेधा इति। वेधा ब्रह्मा विश्वस्य स्रष्टा विशेषेण सर्जनं तत्रैव निरतः आसक्तः। देवोऽपि महादेवो गौरीभुजाभ्यामाश्लेषः आलिंगनं तेन आनंदं सु-
खं तेन विघूर्णमानानि नयनानि यस्य तथा एवंभूतः। दक्षस्य दक्षप्रजापतेः अध्वरस्य यज्ञस्य ध्वंसकः नाशकः। एतेन कामक्रोधयोर्वशित्वम-
रुदेवस्फक्तो दैत्यादिः विष्णुः कमला लक्ष्मीस्तस्याः कपोलं गंडस्थलं तत्र मकराकारलेखापत्रलेखनियावत्। तया अंकितं चिह्नितं उरःस्थ-
लं यस्य सः। एतेन कामवशता उक्ता। अयोध्यारसमप्रोतेषु पिति। अनेन तमोगुणाधीनता। एवमादिषु शांत्यचावसिद्धेष्वितरे पुरुषा ते।

तथा हि। वेधा विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरीभुजाश्लेषानंदविघूर्णमाननयनो दक्षाध्वरध्वंसकः। दैत्यारिः कमलाकपोल-
कबरीलेखांकितोरस्थलः शेते भावितरेषु जंतुषु पुनः कानाम शांतेः कथा॥ पुरुषं प्रति। भद्र गच्छ कामं सत्वरमुपेत्या देशम-
स्माकं प्रतिपादय। यथा दुराशयो धर्मः इति अस्मान्निरवग्रहं तत्तदस्मिन्मुहूर्ते मम पि निबध्य सितव्यं। दृढं बद्धा धारयितव्यः। पुरुषः। जं-
देवो आज्ञापयतीति निःक्रांतः। महामोहः। स्वगतं विचिंत्य। अयं शांतेः कोऽप्युपायः। अथवा अलमुपायांतरेण। क्रोधलोभावे-
वतावदत्रैतामत्र पर्याप्तौ। प्रकाशं। कः कोऽत्र भोः। प्रविश्य दौवारिकः। आज्ञापयतु देवः। राजा। अरे संगतावदाज्ञाप्यतां क्रो-
धो लोभश्च। पुरुषः। यदाज्ञापयति देव इति निष्क्रांतः। ततः प्रविशति क्रोधो लोभश्च। क्रोधः। श्रुतं मया शांतिश्रद्धाविष्णु-
भक्त्यादयो महाराजस्य प्रतिपक्षं समाचरंतीति। अहो मयि जीवति कथमासामात्मनिरपेक्षं चेष्टितं। तथा हि। अंधीकरो-
मि भुवनं बधिरीकरोमि धीरं सचेतनमचेतनतां नयामि। कृत्यं न पश्यति न येन हितं शृणोति धीमानधीतमपि न प्रतिसंद-
धाति॥ २०॥ लोभः। अरे मदुपगृहीता मनोरथसरित्परंपरामेव तावन्न तरिष्यंति किं पुनः शांत्यादीक्षितयिष्यंति। पश्य सखे।

कानाम कथा न कापीत्यर्थः। जाल्म जार एतन्नामहूतस्य। आदेशं आज्ञां दुराशयो दुरभिप्रायः। पुरुषः। यदेवमाज्ञापयतीति।
आत्मनिरपेक्षत्वं स्वात्मापेक्षारहितं। अंधीकरोमीति। भुवनं त्रैलोक्यमंधमप्रकाशं करोमीत्यर्थः। धीरं धैर्ययुक्तं सचेतनमचेत-
नतां हृदयशून्यतां नयामि। क्रोधवशेन हि सर्वस्य आंध्यं भवति अधैर्यं भवति। हृदयशून्यता च भवतीति भावः। कृत्यं पुमान्कृ-
त्यं कार्यं न पश्यति। स्वात्महितं न शृणोति। धीमानधीतमपि पठितमपि न प्रतिसंदधाति न संस्मरतीत्यर्थः। मदुपगृहीता लोभ- १५
विता इत्यर्थः। मनोरथा एव सरित्परंपरा एव॥ ॥

संत्येते इति। एते मम दंतिनो गजाः संति। कीदृशा दंतिनः। मदजलेन प्रम्लानं म्लानं गंडस्थलं येषां ते। एतेन मम भृंगा भ्रमंतीति। कीदृशाः
वातवत् वायुवत् व्यापयंतीति विस्तारयुक्तं यथा भवति तथा पतंति गच्छंतीति तेन या। भूयोऽपि पुनरपि परानन्यान्लप्स्यामि। एतदर्थं
प्राप्तमिदं पुनः लप्स्ये प्राप्स्ये पुनः इदमधिकं लब्धा धास्यामीति चिंतया जर्जरं शिथिलं चेतो येषां ते तादृशानां नृणां। बत इति खेदे
शांतेः का नाम कथा। न कापि वार्तेत्यर्थः। त्वाष्ट्रमिति। सुरपतिः इंद्रः त्वाष्ट्रं त्वष्टुरपत्यं वृत्रं वृत्रासुरं अपातयत् अमारयदित्य-
र्थः। चंडः रुद्रदेवः ब्रह्मणः शिरः अछिनत्। कौशिकः विश्वामित्रः वसिष्ठपुत्रान् घातयत् अमारयदित्यर्थः। इदं च क्रोधपरवश-

संत्येते मम दंतिनो मदजलप्रम्लानगंडस्थला वातव्यायतपातिनश्च तुरगा भूयोऽपि लप्स्ये परान्। एतल्लब्धमिदं लभेय-
नरिदं लब्धाधिकं ध्यायतां चिंताजर्जरचेतसां बत नृणां कानाम शांतेः कथा॥ २१॥ क्रोधः। सखे विदितस्त्वया मत्प्रभावः॥
त्वाष्ट्रं वृत्रमपातयत्सुरपतिश्चंडश्च रुद्रोऽछिनद्देवो ब्रह्मशिरो वसिष्ठतनयानाघातयत्कौशिकः॥ अपि चाहं। विद्यावं-
त्यपि कीर्तिमंत्यपि सदाचारावदातान्यपि प्रोच्चैः पौरुषभूषणान्यपि कुलान्युद्धर्तुमीशः क्षणात्॥ २२॥ लोभः। प्रिये तृष्णे
इतस्तावत्। प्रविश्य। तृष्णा। किं आणवेदि अज्जउत्तो। लोभः। प्रिये श्रूयतां। क्षेत्रग्रामवनाद्रिपत्तनपुरद्वीपद-
मामं लभ्य प्रत्याशाधनस्तत्र बद्धमनसां लब्धाधिकं ध्यायतां। तत्को देवि यदि प्रसीदसि तनोष्यंगानि तुंगानि चेत्तत्कोधा-
ण्डं तां कृतां शमकथा ब्रह्मांडजैरपि॥ २३॥ ॥

क्षेत्रं इति मत्स्य भाव इति भावः। साक्षात्स्वकार्यकर्मातिशयमाह। अपि चाहमिति। अहं एतादृशान्यपि कुलानि अविलंबेन उद्धर्तुं ताप-
यितुं ईशः समर्थः। कीदृशानि विद्यावंति अतिकीर्तिमंत्यपि सदाचारेण अवदातान्यपि शुद्धान्यपि प्रोच्चैरतिशयितान्यपि पौरु-
षभूषणान्यपि एवमनेकगुणविशिष्टान्यपि कुलानि हंतुं समर्थः किं पुनरन्यानीति भावः। तृष्णा। किमाज्ञापयति
आर्यपुत्रः। देवेति। नो संतोषं भुनं। हे देवि यदि प्रसीदसि तनोषि अंगानि स्वावयवानि अंगानि तनोषि विस्तारयसि चेत्सदा
प्राणभृतां जीवानां ब्रह्मांडजैरपि ब्रह्मांडे हि तिरोधः शमकथा कदाचनापीत्यर्थः। कथं भूतानां प्राणभृतां। क्षेत्रग्रामादीनां यथा प्रत्येक-
नि माशा सैव धनं विंस्तत्रैव बद्धं मनो येषां पुनः कथं भूतानां। तल्लाभादधिकं ध्यायतां चिंतयतामित्यर्थः॥ ॥
नि

रसा।।आर्यपुत्रस्त्वयमेवतावत्‌अहंएतस्मिन्नर्थेनियमनियुक्ता।सांप्रतंआर्यपुत्रस्यआज्ञयाखलांऽकोटिविरपिनमेवदंष्ट्रायिष्यति।
हिंसा।।एषास्मिआज्ञापयतुआर्यपुत्रःसहधर्मचारिण्यामइक्ककारिण्येत्यर्थः।ईषत्करएववसुकरएवेत्यर्थः।।क्रोधःक्रुद्धस्यस्वस्यस्वरूपं
दर्शयति।केयंमातेति।कुटिलाःवक्राःविटद्धलंपटास्तेषामपिवक्रुत्तचेष्टितं।सौहार्दचेष्टितंयेषांताहशाश्चमीज्ञातयःकेनकेपीत्यर्थः।।ए
तेनसर्वथाउपालंनायोग्यानांपित्रादीनांउपालंभेअन्येषांकाकथेतिदर्शितं।आगर्भमितिनावक्रोधवक्रेःस्फुलिंगाविरतिंविरामंन
दधतिनांगीकुर्वंति।यावदेषामखिलंकुलमागर्भगर्भानवधिनैवनिःशेषयामिनैवसमापयामि।काहशाः।स्फुरंतःदीप्यमानाः।।क्रोधो
हितायमारणाघनंतरमेवशाम्यतीतिभावः।। ॥

रसा।।अज्जउत्तस्सअंजेवतावदहंएतस्सिंअत्थेणिउत्ताअहिंजुत्तासंपदंअज्जउत्तस्सआणाएजम्मंऽकोटिंहिंपिणमेउअलं
पुलिस्सदि।क्रोधः।।हिंसेइतआगम्यतां।।अविस्पहिंसा।।एसम्हिआणवेदुअज्जउत्तो।।क्रोधः।।प्रियेत्वयासहधर्मचारि
ण्यामाहपित्रादिवधोपिममेषत्करएव।।तथाहि।।केयंमातापिताचकःस्वजनकोभ्रातरःकेत्रकीटावधोयंबंधव
र्गाःकुटिलविटसुहृच्चेष्टिताज्ञातयोमी।।हस्तोनिपात्यः।।आगर्भंयावदेषांकुलमिदमखिलंनैवनिःशेषयामिस्फुरंतः
क्रोधवह्नेर्नदधतिविरतिंतावदंगेस्फुलिंगाः।।२१।।अग्रतोविलोक्य।एषःस्वामीतावदुपसर्पामः।।सर्वेउपसृत्य।जयतुजय
तुदेवःकिमर्थंवयमाहूताः।।आज्ञापयतुदेवः।।राजा।।श्रद्धायास्तनयाशांतिरस्मद्विद्वेषिणीसावनविजिनिग्राह्येतिस
र्वैयदादिशानिदेवस्तिनिःक्रांताः।।महामोहः।।श्रद्धायास्तनयोपक्षेपेणउपायांतरमपिहृदयमारूढं।।तथाहि।।शांति
र्नामश्रद्धापरतंत्रातत्केनाप्युपायेनशांतेःसकाशाच्छ्रद्धापकर्षणंकर्तव्यं।ततोमातृवियोगेनदुःखार्ताअतिमृदुतयाशांतिः
परतनावान्विष्यति।अवसीदत्येवविनश्यति।श्रद्धांचाकर्षुंमिथ्यादृष्टिरेवविलासिनीपरंप्रगल्भेति।तदस्मिन्विषयेसैव
नियुज्यतां।पार्श्वतोविलोक्यभ्रमावतिसत्वरमाहूयतांमिथ्यादृष्टिर्विलासिनी।।विभ्रमवती।।जंदेवोआणवेदि।निःक्रम्य
मिथ्यादृष्ट्यादृष्ट्यासहप्रविशति।। ॥ १५

उपक्षेपेणसंबंधिकपदाकथनेन।हृदयमारूढंस्मृतमित्यर्थः।श्रद्धापरतंत्राश्रद्धाधीना।विभ्रमावती।यदेवःआज्ञापयति।। ॥

मिथ्यादृष्टिः।सखिविरहदुःखस्यमहाराजस्यकथंमुखंप्रेक्षिष्येमुखजुर्मामहाराजउपालप्स्यति।विभ्रमावती।।सखिचिरमुखदर्शनेनआ
त्मानमेवयदिमहाराजोवेश्यतेनतदाउपालप्स्यति।मिथ्यादृष्टिः।सखिकिंमांअलीकंसौभाग्यसंभाव्यविडंबयसि।।विभ्रमावती।।स
खिसांप्रतमेवप्रेक्षिष्ये।अलीकत्वंसौभाग्यस्य।अन्यवनिताह्रर्मज्ञंप्रियसख्यालोचनंप्रेक्षयामि।किंखलुप्रियसख्यालोचनस्यवि
निद्रायाःकारणं।।मिथ्यादृष्टिः।।सखिएकवल्लभाप्रियास्त्रीभवति।तस्याअपिनिद्रादुर्लभा।किंपुनरस्माकंसकललोकवल्लभानां।।विभ्र
मावती।।काकापुनःप्रियसुखावल्लभा।।

मिथ्यादृष्टिः।।सहिचिरदिट्ठस्समहाराअस्सकधंमुहंपिक्खिस्सं।एंखुमंमहाराओउवालहिस्सदि।।विब्भमावती।।सहिअ
उज्जमुहदंसणेणअप्पाणंजेवजइमहाराओवेइस्सदितदोउवालहिस्सदि।।मिथ्यादृष्टिः।।सहिएक्कवल्लहाविआइ
त्थिआजोदिताएविणिद्दाउल्लहाकिंपुणअम्हाणंसअललोअवल्लहाणं।विभ्रमावती।।केकेपुणप्पिअसहाएवल्लहा।। ।
मिथ्यादृष्टिः।।महाराअउवरिकामोकोहोलोहोअहंकारोअधवाअलंविसेसेणएदक्कुलेजोजाओबालोवुड्ढोविसोउ
आणेणंहिअआणिहिदाएमरएरत्तिदिअहंइअहिरमदि।।विभ्रमावती।।सहिइमस्सकामस्सरदीकोउ
त्तहिंसाजोहस्सतिङ्खापरमप्पिआतिसुणीअदिताणंकधंजंप्पिअम्ममंतिवीरमअंदाणइस्संजसेसि।।मिथ्यादृष्टिः
सहिईसेत्तिकिंणणीअदि।णंताओविमएविणामुहुत्तंपिविहरदि।।विभ्रमावती।।सहिअदोजेवक्खणंमिउसरिसासु
हआइक्खिआपुहवीएलक्खिआएसोहग्गमदोअविअरिअहिअआसवत्तीओपसाअंपडिच्छंदिसहिअणंवण्णामि।। ।
एवंणिद्दाउलहिअआसंवलंतवरणाणेउजणेकारमुहजाएणदाएमहाराअंसंभावअंदांतंकिदहिअअंकरिस्सदिपिअस
हातितकेमि।

मिथ्यादृष्टिः।।महाराजोपरिकामःक्रोधःलोभःअहंकारःअथवाअलंविशेषेणअस्मिन्कुलेयोजातःबालःस्थविरोवावाहृदय
निहितयामयारात्रिंदिनानिरमंते।।विभ्रमावती।।ननुइयंकामस्यरतिःक्रोधस्यहिंसालोभस्यतृष्णापरमप्रियाइतिश्रूयंते।तासांक
थंत्वत्प्रियतमंनिश्चरमयंतीनईर्ष्याजनयसि।मिथ्यादृष्टिः।सखिईर्ष्येतिकिंनएषतेनताअपिमयाविनामुहूर्तमपितिष्ठंति।विभ्रमावती।।स
खिअतएवत्वांमन्येबहुसहस्रीसुभगास्त्रीदृष्टिर्यानास्ति।यस्याःसौभाग्यमदांधविकारितलद्याःसपत्न्यःप्रसादंप्रतीच्छंतिसौभाग्यस्यमहर्द्धिः
महासंपत्तिःतयाविधारितेरहितंहृदयंयासांताइत्यर्थः।।सखिअन्यत्त्वांवर्णयामि।एवंनिद्राकुलहृदयासरवजंद्ररणेरुपुरंकारमुखरागमनाम

हारजं संभावयंतीरं किं तत्कदर्थं करिष्यतीति प्रियसखी तितर्कयामि। ।मिथ्यादृष्टिः। किं मत्रं किं तव्यं। ननु अस्माकं महाराजनियुक्तानामेव
एषो विनयः अपि च सत्त्वविदर्शनमात्रप्रसन्नानां पुरुषाणां कीदृशं भयं। श्रोणीभारे इति। या एवमादौ जीवति जंघे तत्र लोलं चंचलं कं कणं भूषणं
तस्य रणत्कारः शब्दः तन्नेरोधवशं यस्याः क्रियापर्यायपाठ्यवर्तितथा सर्पतिगच्छति। कीदृशी श्रोणीभारः नितंबस्थली तद्रेणालसौरवेणास
जसा। पुनः कीदृशी। दरेणयुक्तम् लन्मात्यस्य उ पत्र्वमिश्रितं संवरणं मिषं तस्माद्भ्रुल्लपात्रहृद्धि स्तन्भगुणो यस्याः सा। पुनः कथं भूता। उप
दर्शितो पाक्षकांतत्रवृत्तिभ्रमन्ती विकसंती नखांकावलिर्नखक्षतपंक्तिर्यस्याः पुनः कीदृशी। मनः धर्षयंती प्राणयंती। कथं भूतया दृष्ट्या

। ।मिथ्यादृष्टिः। ।किं एतत् संकिदद्भुतं अस्माकं महाराज अतिभक्ताएं कैदएसो अ विलम्बो। अचिरं। सहिदंसणमत्तप्पसण्णा
णं केरिसं भयं। ।महामोहः। ।विलोक्य सर्वप्रासेव प्रिया मिथ्यादृष्टिः याएषा। ।श्रोणीभारभरालसा दरगलन्माल्योपह्र
सितकुलाद्भुलोऽस्मिस्तनो पदर्शितकोन्मीलन्नखांकावली। नीलेंदीवरदामदीर्घतरया दृष्ट्या धयंती मनो दोलांदोलनलो
लकंकणरणत्कारो स्मरं सर्पति।।३३।। विभ्रमावती।। ।एसो महाराओ उपसप्पदु पियसही।। ।मिथ्यादृष्टिः। ।उपसृत्य। जयदु
जयदु महाराओ। ।महामोहः। ।प्रिये। ।दलितकुचरेखाकम्पकपाली स्वयमनमांसकमुपेत्य पीवरोस्तान् नुहरहरिणाक्षि शंकरी
कल्पितहिमरौलसुता विलासलक्ष्मी।।३४।। मिथ्यादृष्टिः। ।सस्मितं तथा करोति। ।महामोहः। ।आलिंगनसुखमभिनीय। अहोवि
यापरिष्वंगात्पुनः प्रादुर्भावौवनमूढ। तथाहि। ।यः प्रागासीदभिनववयोविभ्रमावाप्तजन्मा चित्तोन्माथी विगतविषयोपप्लवा
नंदसांद्रः। तन्नीरंतःस्थिरपतितनावास एषन्मासको पि प्रौढ प्रेमानवइववपुनर्मानसो मे विकारः।।३५।।

नीलोत्पलमालात दीर्घतरा यती। विभ्रमावती। एषः महाराजः उपसर्पतु प्रियसखी। मिथ्यादृष्टिः। जयतुरमहाराजः। प्रिये दलितेति। कौ
प्रियेदलिताः प्रकाशिताः अचरांकाः कुचस्तनोनखक्षता नियस्याः क्रियापर्यायपाठ्यवर्तितथा अंकपाली आलिंगनं रचय। किंभूता मम
अंके उपेत्य। जोपीवरोरु मांसलोरु। नोहरि णाक्षि शंकरांके स्थिता हिमशैलसुता गिरिजा नस्याः विलासलक्ष्मीविलासशोभा अनुहरअनुसर।
यः प्रागासीदिति। सको पि वकुमरा वक्षः मानमथः कंदर्पजः विकारः मे मम अंतः हृत्तिनि स्थिरयति। सकोऽभिनववयः तारुण्यं तस्माद्विभ्रमः उद्भास्त १३
न अवाप्तं जन्म येन एवं भूतं प्रागासीत्। कथं भूतो मन्मथो विकारः अभिनववयः चित्तोन्माथी चित्तं उन्मथ्नाति अवशं करोति। तथापुनर्गतः विनष्टः
विषयोपरागः विषयानुसंधानमितियावत्। यस्मिन् आनंदसुखेतेन सांद्रः निविडः ताहक्षप्रधान इत्यर्थः। पुनः कीदृक् तवालिंगनं तेन जन्म

उत्पन्निर्यस्य सतथा। पुनः कीदृशः। प्रौढं प्रेम प्रीतिर्यस्मिन्। तत्प्रौढप्रेमा नवइव अभूतपूर्व इव। मिथ्यादृष्टिः। महाराज अहमपि सांप्रतं नवयौ
वने वसंस्थता। नखलुभावानुवर्द्धप्रेम कालेनापि विलीयते। भावस्थिता निश्चयात्मकं अनुबर्द्धनिर्मितमित्यर्थः। आह्लाप्यतु महाराजः। किं
निमित्तं नघर के एपस्मृतास्मि। स्मर्यते इति। मन्चित्तमेव भित्तिस्तत्र भवती शालभंजी व चित्रपुत्रलिकेव राजते। यथा भित्तिचित्रपुत्रलिकयो
र विनाभावस्तथा। महा मोह मिथ्या दृष्ट्योरितिभावः। मिथ्यादृष्टिः। महाप्रसादः। अ... तिकृपा मिति। अकुलजां दुर्जगांप्रस्तां अतिमन
श्री सो निर्वृत्तिं अनुरागान्नावादुर्जगात्वं पापांकुलजं कुलत्रयेष्वरन्नत्वात्। तथा पापा पात्कुलक्षयप्ररजनात्। मदमादयातदनुवर्त्तिनीतदनुकूलां पा

।मिथ्यादृष्टिः। ।महाराज अहं पि संपदं एवज्जोवणे बसंवुत्ता णं कुलनावाणुबद्धो प्पेमो कालेण वि विलीअदि। आदिसदु महा
राओ किं निमित्तं अहं आकेएपसुमरिदह्मि। ।महामोहः। ।प्रिये। ।स्मर्यते सहृदि वामोरु जाति यो हृदयाद्धि। मच्चित्तभित्तौ भव
तीसालभंजीव राजते।।३६।। ।मिथ्यादृष्टिः। ।महाप्रसादो। ।महामोहः। ।अन्यच्च भद्रे दास्याः पुत्री गद्धा विवेकेन सह उपनिषदं संयो
जयितुं अहिंनिशं प्रतिपन्ना। यतः। ।प्रतिकूलामकुलजां पापां पापानुवर्तिनीं। केशेष्वाकृष्य तां रंडां पाखंडेषु निवेशय।।३७।।
मिथ्यादृष्टिः। ।एदं हृम मंदं दि वि म एअं जं अ हिला सिआ हि त एवं जंआ महणं नत्तकेणकेवलं सहि सोदासीबसाआसंकरिस्सदि।
१ ता सुणत्थेमिच्छाधम्मो मिच्छामोक्खो मिच्छा वेअमग्गो मिच्छाविग्घकराइं मिच्छासत्थप्पलविअंगाणि दाणि हंबेदमग्गं जेव प प्र॰ टि॰
रिहरिस्सदि किं उणउवणिसदं अविअविस आणंदविमुक्कं मोक्खे दोसाणि प्पदंसंती एणंतु वणिसदं विरत्ता करइस्सदि
म एसखा। ।महामोहः। ।यद्येवं सुष्ठु प्रियं मे संपादितं। प्रियां पुनरपि आलिंग्य चुंबति। मिथ्यादृष्टिः। एवं पमत्तेण नहि प्रकाशं
णा जल के मि। ।महामोहः। ।तद्भवतु वासागारमेव प्रविशामः।। ।।

खंडेषु वेदबाह्येषु। मिथ्यादृष्टिः। एतावन्मात्रके पि विषये अलं अंतर अभिनिवेशेन वचनमात्रकेणैव सा सुंदरी दासी वशा आयत्ता करिष्यति।
सा खलु मया मिथ्याधर्मो मिथ्यामोक्षो मिथ्यावेदमार्गो मिथ्याविघ्नकराणि मिथ्याशास्त्रप्रलपितानि इति भाणिता। अटिति वेदमार्ग
मेव परिहरिष्यति। किं पुनः उपनिषदं। अपि च। विषयानंदविमुक्ते मोक्षे दोषान् प्रदर्शयंत्या उपनिषद्देवी विरक्ता करिष्यते मया
सखा। मिथ्यादृष्टिः। प्रकारां एवं प्रवृत्तेन मत्तालजामि। वासायतं वासगृहमित्यर्थः।। ।।

नीवारेति। हंसविमयात्कश्चिदपि जन्मापि न्महोविस्मये अद्यायावार्त्तापि नाकर्णिता। वार्त्तायामपि अद्यानश्रुतेतिनावः॥ ननु कथयाचे
ष्टिताइत्यपेक्षायामाह। मयानीवारैः कुबिधान्यैरंकितानिचिह्नितानि सैकतानिपुलिनानियेषां तानि। तथा वैखानसैर्वानप्रस्थै राक्रांता
निव्याप्तानि एवंभूतानियानि सरितांनद्यानां कूलानितीरा।णिलिता निनिरूपितानि आन्विष्टानि। त्यर्थवशाद्यत्ययः॥ पुनः यञ्च नागृहः प्रत्ये
कंनिरूपिताः कीदृशाः सनिर्वखालजन्मसेयंमोपकरणैः व्याप्ताः। एवमप्यर्थे चत्वारः आश्रमाः अपिप्रतिपदं प्रतिष्ठानं निरूपिताः एते
नकलाविदानीं प्रायःपरिहरमानानि विकानिजविकामात्रहेतून् निदर्शितं। करुणा। यदिसैवसात्त्विका श्रद्धानदातस्यानताद्दशी
दुर्गतिं संभावयामि। नखलुताद्दशः पुरुषमप्य एताद्दशीविपत्तिमनुभवंति।

शांति॥ ।सखिकियदन्विष्यते ।नीवारांकितसैकतानिसरितांकूलानि वैखानसैराक्रांतानि समिद्दर्भाव लव र्षकैर्व्याप्ताग्रहा
पञ्चमं। प्रत्येकं च निरूपिताः प्रतिपदं चत्वार एवाश्रमाः अद्यापि क्वचिदप्यसौ सखिमयावार्तापिनाकर्णिता॥४१॥ करुणा। स
खिएवंन एणमिन्नइसाक्केव सहकोसहवादताएणं एतारिसो दुग्गदीसंभवणमिणखु ताद्दिस्तो अपुरुसम्मणो एतादिसी
प्रसि॰म्र ॰जवंदि। निष्फाहदि। ।इह जन्मनीविविस्मये अलं नहिता आलिखिये ससासं आमञ्च शांतिः ।सखिकिमिवप्रतिकूले विधात
रिनसंभाव्यते। ।तथाहि। ।देवी अञ्जनकात्मजा दयाशुखस्याभी हहे दहसोमिताविवरसातलं भगवती हर्वत्रयी चन्द्रानवैः
रिगंधर्वस्यमदालसांवतनयां पातालकेतुः छलाद्दैत्येन्द्रोपजहारहंतविषमावामाविधेर्हन्त यः॥४२॥ अकुवउपास्वंडालंपिवता
वहुतीतमनुसरामः॥ करुणा। ।सहिएवंजोदु। परिक्कामतः। ।करुणा अन्ततो विलोक्य सत्रासं। सहिरक्खसोर। शांतिः। सखिकोसौ
राक्षसः।
देवंप्रमाणयंताव्याह। शांतिः। देवीअञ्जनकात्मजेति। हंतइतिखेदे। विधेर्दैवस्यहन्तयंश्वरितानि वामा विलक्षणा॥ तदेवदर्शयति। दे
वीजनकात्मजासीतादशमुखस्यरावणस्यगृहे आसीत्। एवंपूर्वकालेनभगवतीत्रयीवेदत्रयीदानवैर्दैत्यैरसातलं नीता। पातालं प्रापिता
अपरं गंधर्वस्य मदालसांनामगंधर्वतनयांकन्यां दैत्येन्द्रः पातालकेतुर्यः छलान्मिषादपजहार स्वनिकटंनीतवान्। एवं गत्यान्नयोगा १८
अपिपापं स्वं इहत्वगमनंसंभाव्यत इतिभावः॥ करुणा। सखिएवंनवत। करुणा। सखिराक्षसः राक्षसः।

प्र:
करुणा। सखिप्रेक्षस्वएषोगजन्मलपंकपिच्छिलबीभत्सदेहच्छवि। गलत्तस्रवत्यो मलपंकः विष्ठादिकर्मजस्तेन पिच्छिलाचिक्कणा
अतएवबीभत्सा भयानकाद्ध्वंसा आतनुमशकपादेहच्छविः शरीरकांतिर्यस्य सतथेत्यर्थः। उर्द्धविलविकटः उत्पाटितकेश इत्यर्थः॥ लुंचकव
नः वेशदुर्दर्शनः॥ शिखिशिखंडपिच्छिकाहस्तो मयूरपिच्छनिर्मित नहस्तः इत्यर्थः॥ इतएवाभिवर्त्तते। करुणा। नतोएषत्तिविष्यति। करुणा।
सखिएवंप्रस्फुरन्महामयूखमालोद्भासितभुवनांतराले ज्वलति प्रचंडमार्तंडमंडले कथंपिशाचानामवकाशः॥ प्रचंडः प्रखरो मार्तंडः सूर्यस्त
स्यमंडले ज्वलति दीप्यमाने कथं पिशाचानां निशाचराणां अवकाशः॥ अवसरइति। कथं न तेसूर्यमंडले। स्फुरंती महती यामयूखमाला कि
रणपंक्तिस्तया उद्भासितं प्रकाशितं भुवनांतरालं भुवनविवरं येनसतस्मिन्।

करुणा। ।सहिं पिक्खस्स जो एसो गलंतमलपंकपिच्छिलविहस्सदुप्पिक्खदेहच्छवि उद्धुंचियविउरो मुक्कवसणो वेसदुद्दंसणो सि
हिसिहंडपिच्छिआहत्थो इदो ज्जेव अहिवहदि। ।शांतिः। ।सखिनायंराक्षसः॥ निर्वीर्यः खल्वयं। ।करुणा। ।ताको एसो भविस्स
दि। ।शांतिः। ।सखिपिशाचइतिशंके। ।करुणा। ।सहिएवं प्पस्फुरंतमहामऊखमालोज्जासिअभुवणंतराले जलंते पयंडमत्तं
डमंडले कधं पिसाआणं अवआसो। ।शांतिः। ।तर्ह्यनंतरमेवनरकविवरादवतीर्णः कश्चिन्नारको भविष्यति। विचिंत्य
आःज्ञातं। महामोहप्रवर्तितोयंदिगंबरसिद्धांतः। सर्वथादूरेपरिहरणीयमेवास्यदर्शनं। इतिपराङ्मुखीभवति। ।करुणा। ।स
हिमुहूर्त्तं पडिवालेहि जाव एदस्सहं अक्खेसामि। इत्येतथास्थिते। ततः प्रविशतियथानिर्दिष्टो दिगंबरसिद्धांतः। क्षपणकः। ।एसोसि एट
धारांकुलिहंताणं नवदुआरमज्झे अप्पादीपजलणगंको। रसो एणिजैवरभासिदेपरमत्थ सोक्खमोक्खदे। परिकामति।
आकाशे। अजेसावकाणुएदमयैलमयपुग्गलपिंडे सव्वजल ऐहि पिकेजिसीसुद्धि। अप्पा विमलसहावो जिसिपलि
चलणेहिं जाणिदव्वो।
करुणा। सखिमुहूर्त्तं कंतिष्ठ यावदत्रअद्यामन्वेषयामि। यथानिर्दिष्टः ज्ञो एसो इत्यादिनेत्यर्थः। दिगंबर इत्यादि। अस्यभाषामागधी।
प्रायशताद्वीतरभेदः। लडकंभिरुककद्धपणकरात्रसोतः पुरवारिणं मागधीति। नमः सिद्धेभ्योऽर्हद्भ्यो नवद्वारगृहमध्ये आत्मादीपः ज्वलण
कः एषजिनवरभाषितः परमार्थसौख्यमोक्षदः। एतांतर्वर्त्ती दीपवत्परमार्थसौख्यमोक्षदायकाः शिष्यसंज्ञ इत्यभिधानात्। मलमयपुद्ग
लपिंडे सकलजलैरपिकोदृशाशुद्धिः। आत्मा विमलस्वभावः ऋषिपरिचरणैर्ज्ञातव्यः॥ पुद्गलः शरीरमित्यर्थः॥ पुद्गलो वपुरात्मनोरिति धरणीकोशात्।

नस्य श्लेष्मादिपूर्णत्वान्नकथमपि शुद्धिरिति भावः। कृमिपरिचरणैः कृमिसेवनैरित्यर्थः। उपाध्यायं दृष्ट्वा आह। किं श्रमणाधेति किंश्रमणाधम। कोऽयं त
त् कृमिपरिचरणमिति। न श्रूयते। हरिचरणप्रणामः हन्त सत्कारं वचोनमेमि इह ईर्ष्यामलेन कार्यं किम्। दांपदारान्रमयमाणानां। श्रद्धे इतस्ता
वत्। उभे सत्यमालोकयतः। इतस्तावत्। उभे परां निरूपतः। श्रद्धा। किमाज्ञापयति राजकुलं। दिगंबरः। श्रावकाणां कुलं नापरिहरिष्यति अव
ता। तिशेषः। श्रद्धा। यदाज्ञापयति देवराजकुलं। करुणा। समाश्वसतु प्रियसखी। न खलु नाममात्रकेण पि प्रियसख्यो नेतव्या। यतः अतमु
पाअहिंसासकाशात्। यदत्तिपाखंडानाम पितमसा सुता श्रद्धेति तेन एषा तामसा श्रद्धान्न विष्यति।

किं श्रमणाधके लिसंतं लिसिपजिचजणंति तं श्रमणाध। हूजेवलण पणामो किं असक्कालं वने अमणं मिट्ठं। ईसामलेण कज्जं लिसि दांपदा
रमन्ताणं। नेपथ्यमवलोक्य। सदेह दोदाव। उभे सत्यमालोकयतः। ततः प्रविशति तदनुरूपवेशा श्रद्धा। ।श्रद्धा। ।किं आणवेदि
राउले। ।शांतिः। मूर्छिता पतति। ।दिगंबरः। ।सावकाणं कुलं मुऊण कं पि माप लिहलिस्सदि। ।श्रद्धा। ।जं आणवेदि राउले। इति
संजाप्यनिःक्रांता। ।करुणा। ।समस्सस्सदु पिअसही। एणखु णाममत्तकेण वि पिअसही ण तेदव्वा जदो सुदं मए। अहिंसासआ
सादो जं अक्कि पासंडाणं पितमस्सुदा सद्धे ति तेणएसा तामसी सद्धा भविस्सदि। ।शांतिः। ।समाश्वस्य एवमेतत्। ।दुराचारा सदा
संदुदर्शाप्रियदर्शनां। अवामनुसरत्येषा दुराचानकश्चन। ।तद्वत्तु तावत् सौगतेष्वप्यन्वेष्यते। परिक्रामतः। ततः प्रविशति
भिक्षुरूपः पुस्तकहस्तो बुद्धागमः भिक्षुः। विचिंत्य भो भो उपासकाः। ।साक्षात्क्षणक्षयिणो वनिरात्मकाश्चयत्रार्पिता बहिरिव
प्रतिभांति भावाः। सैवाधुना विगलिताखिलवासनात्वात्संततिः स्फुरति निर्विषयोपरागा। परिक्रम्य सत्साहं अहो साकरयं सौ
गतो धर्मः। यत्र सौख्यं मोक्षश्च।
उपासकाः। भिक्षुः विलक्षणवेषत्वात्कथमपि नानुकरोतीति भावः। सौगतेषु प्रत्यक्षानुमानप्रमाणद्वयवादिषु बाह्यविशेषेषु बुधा
गमः बुद्धशास्त्राभिमानी देवतायाः उपासकाः बुद्धशास्त्रविचारनिरताः। साक्षादिति। सैवधीसंततिः अधुनानिर्विषयोपरागा विषयसं
बंधरहिता स्फुरति प्रकाशते। कुत इत्यपेक्षायामाह। विगलिताखिलवासनत्वात् छिन्नसमस्तसंसारसंस्कारत्वादित्यर्थः। सैव कायस्थो
धीसंततौ अर्पिताविषयीकृता भावाः घटपटादयो विषयाबुद्धिकल्पितत्वात्पदांतरा इत्यर्थः। आंतरा अपि बहिरिव बाह्या इव प्रतिभां
ति भ्रांतिमेतीति भावः। पुनः निरात्मकाः स्वातिरिक्तात्मरहिताः। तस्मादनुभवारूढत्वात्सोयमेव मार्गो भवद्भिरादरणीय इति भावः॥ ॥ २९
कीदृशाः भावाः। साक्षात्स्वरूपतः क्षणक्षयिणः क्षणिका इत्यर्थः। न अन्येषां निवर्तनेन वैरिद्योपरमादिति भावः। १

आवास इति। सौगतेधर्मे यमिनां नियमवतां मनोहरं अतिसुंदरं लयनं गृहं आवासः निवासस्थानं आस्ति इति शेषः। अभिप्रायानुरूपा यथा
भिमतवेषधारिणः कुलिकुनार्यो वेश्याः संतीति शेषः। वांछितकाले यथेष्टं मशानभोजनमस्तीति शेषः। मृदुस्वस्तराः कोमलास्तरणाः श
य्याः संतीति शेषः। ज्योत्स्नावद्भदीप्तिस्तयाउज्वलाः प्रकाशमाना रात्रयः। क्व सः अंगरागोपस्मिन्नेताहशो यत्र सवाकाममहो सवस्त
स्मिन् कौतुके जितेन आनंदमनराः सुखसमूहा स्तैर्व्रजंति गच्छंतीत्यर्थः। विलसज्ज्योत्स्नोज्वलाइति वा पाठः। विलसंतिस्वचमत्का
रायोज्योत्स्नातयोज्ज्वलाः यमिनामित्यध्याहर्तव्यं। कथं भूता रात्रयः युवतिचित्तहरणी निःश्रद्धापूर्वं आदरः सर्वज्ञपासिता उपसे
विता इत्यर्थः। वैदिकानां हि स्वामिनां गिरिगुहादिनिवासस्थानं पराधीनं कालातिक्रमेण भोजनमेवं सर्वदुःखरूपमस्माकं तु धर्मा
तथाहि। आवासो लयनं मनोहरमभिप्रायानुरूपा वणिकुनार्यो वांछितकालमिष्टमशनं शय्या मृदुस्वस्तराः श्रद्धापू
र्वमुपासिता युवतिभिः क्व सोंगरागो सवक्राश्लकाशानंदश्चरैर्व्रजंति यमिनां ज्योत्स्नोज्वला रात्रयः। ।करुणा। ।सखि को एसो
तरुणतालतरुपलंबोलंबं तकषायपिसंगचीवरो मुंडिदसउंडपिंडो इदो ज्जेव आगच्छदि। ।शांतिः। ।सखि बुद्धाग
मएषः। ।भिक्षुः। ।आकाशे भो भो उपासका भिक्षुवचः श्रूयतां भगवता सुगतस्य वाक्यामृतं पुस्तकं वाचयति। पश्या
म्यहं दिव्येन चक्षुषा लोकानां सुगतिं दुर्गतिं च क्षणिकाः सर्वसंस्काराः नात्मा स्थायी तस्करैवापवर्गः तस्माद्भिक्षुषु दा
रान्कामयमानेषु नेर्षितव्यं। चित्तमलं हि यत्तद्ईर्ष्या नाम। नेपथ्याभिमुखमवलोक्य अद्धे इतस्तावत्। ततः प्रविशति श्रद्धा। आ
णवेदु राअलो भिक्खू। ।उपासकान् भिक्षून् स्वनिर्भरमालिंग्य सेवयतामिति। ।श्रद्धा। ।जं आणवेदि राअलो इति निःक्रांता।
दृष्टानंदसुखस्वरूपमेवेति भावः। करुणा। सखि क एष पुरुषः तरुणतालतरुवत्प्रलंबः लंबत्कषायपिशंगचीवरो मुंडितसक्रूडमुं
डपिंड इत एवागच्छति। अस्यार्थः। तरुणा श्चोन्नतास्तालतरुस्तालवृक्षः तद्वत्प्रलंबः अत्यच्चः लंबायमानं कषायं गंधतः पिशंगरूपतः ची
रं चीवरं वटवस्त्रं यस्य स तथा। मुंडेति मुंडितः सकूडः सशिखः मुंडपिंडो यस्य स तादृशः। भिक्षुः आकाश इत्यादि। संस्काराः संक्रियंते बुध्या
विषयी क्रियंते भावास्ते सर्वे क्षणिकाः स्थायी इहलोकपरलोकयोरेको नास्तीत्यर्थः। अपवर्गो मोक्षः तस्मात्सर्वस्य क्षणिकत्वादित्यर्थः।
नेर्षितव्यं द्वेषस्य स्वस्यैर्ष्यायाश्च क्षणिकत्वेन परस्परासंलग्नतया निःफलत्वादिति भावः॥ ।।श्रद्धा आज्ञापयतु राजकुलं। श्रद्धा। यदाज्ञापयति
राजकुलं।

कलुणा। एवमेतत्। क्षपणकः पूर्वोक्तोदिगंबरसिद्धांतः। अरे भिक्षुक इतस्तावत्किमपि पृच्छामि। क्षपणकः। अरे मुंच क्रोधं। शास्त्रगतं पृच्छामि। क्षप
णकः। एवमेतत्। क्षणविनाशिना त्वया कस्य कृते व्रतं धार्यते। फलकालेतु आसत्वात्त्वद्व्यर्थमितिभावः। अस्मत्संततिपतितः अस्मद्विज्ञानपरंप
राविष्ट इत्यर्थः। विज्ञानं क्षणक्षणविशिष्टं ज्ञानमित्यर्थः। क्षपणकः। अरे मूर्ख यदि कस्मिन्नपि मन्वंतरे कोपि मुक्तो भविष्यति तदद्यतेसांप्रतंच
नष्टस्य कृते कीदृशं उपकारं करिष्यति। अन्यच्च पृच्छामि। केनेदृशो धर्म उपदिष्टः। अरे सर्वज्ञो बुद्धो भगवानिति त्वया कथं ज्ञातं। क्षपणकः। अरे
बुद्धः सर्वज्ञ इति कथं ज्ञायते। तदहमपि सर्वं जानामि। त्वं मे पितृपितामहे सप्तपुरुषाणां दास इति। क्षपणकः। अरे
शांतिः। सत्यमिदमपि सेवितं मया। करुणा। एवमेतत्। क्षपणकः। भिक्षुमालोक्य उच्चैः शब्दं करोति। अरे भिक्षुक इदोदाव
किं पिपृच्छिस्सं। भिक्षुः सक्रोधं। आः पाप पिशाच वाङ्मते किमेवं प्रलपसि। क्षपणकः। अरे मुंच कोहं सच्छगं पुच्छेमि। भिक्षुः।
। अरे क्षपणकशास्त्रकथामपि जानासि। क्षपणकः। एवं खवणत्तं। पढ़इ पुच्छ किंपि। क्षपणकः। णवि जाणदाव क्षपणविणासि
णा तुए कस्स कदे वदं धालीअदि। भिक्षुः। अरे श्रूयतां। अस्मत्संततिपतितः कश्चिद्विज्ञानक्षणः समुच्छिन्नवासनो मोक्ष इति।
क्षपणकः। अरे मुक्खजइ कस्सिंपि मन्वंतले कोपि मुक्को भविस्सदि तदो दे संपदं पणट्ठस्स कदे कीदिसं उवआलं किदं एत्थ
लंचपुच्छामि केण ईदिसो धम्मो उवदिट्ठो। भिक्षुः। सर्वज्ञेन भगवता बुद्धेन। क्षपणकः। अरे सव्वण्णो बुद्धो अच्छि त एवं कथं
दं। भिक्षुः। ननु रेतदागमादेव प्रसिद्धो यं भवादृशां बुधः सर्वज्ञ इति। क्षपणकः। अरे उज्जुबुद्धिआ जदि तस्स ना सिदे णस्स
वस्स वअणं तस्स पडिपज्जसि। ता हं पि सव्वं जाणामि तुमं मे पिदा पिदामहे हिं सह सत्तपुलिसा जीवदासोत्ति। भिक्षुः। सक्रोधं।
आः पाप मलपंकधर तवार्ह दासः। क्षपणकः। अरे विहालदासी उअंगगदपज्जिअ मा उप्पदिट्ठं तो एसो मए दंसिदे। ता
पिअं दे विदुदं न णेमि। बुधाए सासणं पलिहलिअ अलिहंताणुसासणं अणुसलणं तेदि अं बलवदे केवल आलदइ ण वं।
भिक्षुः। आः पाप स्वयं नष्टः परान पि नाशयितुमिच्छसि। स्वाराज्यं प्राप्य मनुष्यलोकनिंदामपि ठिदिः। अनिवांछति को नाम
भवानिव पिशाचतां।।
विहारदासी उअंगगदपज्जिअ मा उप्पदिट्ठं तेनापमयादर्शितः। विहारदासी भुजंगो वेश्यापतिस्तत्संबोधनं तेन एणमि। बुधानुशासनं परित्यज्य अर्हदनु
शासनं मनुसृत्य दिगंबरव्रतमेव धारय तेन भवान्। स्वाराज्यमिति। को अनिंदितम् प्राप्यं स्वाराज्यं स्वाराज्यमनुष्यत्वं त्यक्त्वा भवानिव लोकनिंदितपिशा
चतां पिशाचस्वरूपं अभिवांछति न कोपीत्यर्थः।। २०

धर्मविदं धर्मज्ञानं कः श्रद्धत्ते। को निश्चिनोतीत्यर्थः। क्षपणकः। ननु ग्रहनक्षत्रचाराद्यं वस्तु परोक्षं करतलगतपरमार्थज्ञानसंवाददर्शनेन निरू
पितं भगवतः सर्वज्ञत्वमर्हतः। अनादि प्रवृत्तेन अनादिसिद्धेन ज्योतिषाज्योतिःशास्त्रेण अतींद्रियज्ञानं इंद्रियासाध्यज्ञानं तेन भूतारितेन
विज्ञेनेदं अतिकष्टं अतिदुःखावहं तत्वं मतमेव ज्योतिज्ञानं उपबाधितमित्यर्थः। तथाहि। नाज्जु मिति। वपुः परिमितशरीरमात्रपरिमाणजी
वः विज्ञानरूपः त्रिलोकी ज्ञानं कथं हन्मते कथं समर्थो भवति। न कथं चिदित्यर्थः। तत्र हेतुमाह। संगतिमंतरेण संगतिं विना घटमा
र्यांत वर्त्मनि सन्न गृहस्योदरे न्यावान् विषयान् प्रकाशयितुं न शक्नोति। प्रकाशरूपो दीपो रातवर्त्मनि जाते शरीरवेश्माभ्यंतर स्थान्न्र
र्यादीन् प्रकाशयेदिति भावः। तथाच्च किंचित्कर्मर्थं बोधयिता अर्थ्यं पितान् वा भृता रितद्रतिता त्वपि लोकद्वय विरुद्धादिहलो कयो र्दु
खावहात्। सा ज्ञानसुखावहं न परं परयाधर्मोप्यविचारेत्यर्थः। करुणा। एवं नवत्र। नरास्थिमालेति। अहं जगत्त्वथ्यामि। कीदृशं विधः परस्पर
अपिच। अर्हतो विधर्मवेदनं कः श्रद्धत्ते। क्षपणकः। गहणकवसंचालं चंदसूलोपलागमणुकलाउं प अमच्छण्णसंवाद दं
सणेण। त्तिद्वविदं न अवदो सच्चण्णत्तणं अलिहंतस्स। भिक्षुः। विहस्य। अनादि प्रवृत्तज्योतिर्ज्ञानेंद्रियज्ञान भूतारिते न
भवताइदमतिकष्टं व्रतमाश्रितं। तथाहि। ज्ञान्त्वं पुं मितेः हन्मते त्रिलोकीजीवाः कथं कथयस्संगतिमंतरेणाक्नोति। कुंभ
परि३ निहितः सुचिरोननदीपो नावान्प्रकाशयितुमप्युदरे गृहस्य। तदस्मा लोकद्वयविरुद्धात् आर्हतमतादरं सुगतदर्शनमेवसा
क्षात्सुखावहं मतिरमणीयं पश्यामः। शांतिः। सखि अन्यतो गच्छावः। करुणा। एवं भोदु परिक्रामतः। शांतिः। पुरोव
लोक्य एषपुरस्तात्सोमसिद्धांतः। नवयत्राप्यावदनुसरावः। ततः प्रविशति कापालिकरूपधारी सोमसिद्धांतः। परि
क्रम्य। नरास्थिमालाकृतचारुभूषणः श्मशानवासी नृकपालभोजनः। पश्यामि योगांजनशुद्धदर्शनो जगन्मिथोभिन्न
मभिन्नमीश्वरात्। क्षपणकः। अले एसो कावालिअ व्रदं पुलिसे धालेदि। ता एणं पि पुच्छिस्सं। अले कावालिआ णलट्ठ जे
मुंडधालिआ के तिसे तु मे धम्मे की लिसो अधमोक्खो।
जिनेंद्रवत्। पुनः कीदृशः। ईश्वरादि भिन्नव्यापन्नलोहपिंडस्फुलिंगा परस्परभिन्ना अपि लोहपिंडादभिन्नास्तथेति भावः। कीदृशोहं नरास्थिमाल
यात्तत्कृतभूषणेन सतथा। पुनः कीदृशः श्मशाने वसतीति श्मशानवासी। पुनः कथंभूतः कपाले भोजनं यस्य सः पुनः कीदृशः योगएवांजन
नं तेन शुद्धं निर्विवादं दर्शनं ज्ञानं यस्य स तथा। एतेन स्वीयव्रतधारणदर्शनं। क्षपणकः। अरे एषः कापालिकव्रतं पुरुषो धारयति तदेनमपि
पृच्छामि। उपसृत्य तिर्यग्गत्वा। अरे कापालिक नरास्थिमुंडधारक कीदृशस्तव धर्मः कीदृशो मोक्षः।। ।।

तावत्त्वधर्ममवधारयेरं निश्चिनुहि। न लिप्तेति। नः अस्माकं बलकपालकल्पिता। स्थापिता सुरामधं तस्य पानं तेन पारणौ व्रतोत्तरदिवसे अश
नविधिरित्यर्थः। कीदृशानामस्माकं वक्त्रोमस्तिष्कैण कपालवर्तिरसेन अन्नामिश्रिता या वसा तया अभिधारिता निमद्दितिस्थूलानि यानि मां
सानि तेषामाहुतीर्जुहुतां कृमप्रयमाना ना एष कोधर्मः। अथापरमाह। नः भैरवो देवो अर्च्यः इज्यः कैः पुरुषा एवोपहारबलयः। नैवेद्यानि तैः क
सानि तेषामाहुतीर्जुहुतां कृपमाना नाए षकोधर्मः। ... छिन्नः कठोरपुरुषकंठः तस्मात् विगलन्ती जालं रुधिरं तस्य उद्दलानि सेवनानि येषु ताहशैः। क्षपणकः। अर्हत्तम
र्थः अतो सघत्तकोर्जत्तः छिन्नः कठोरपुरुषकंठः तस्मात् विगलन्ती जालं रुधिरं तस्य ... विप्रलब्धोवं चितः। आः पापेत्यादि महिमानमित्यंतं प्रसिद्धं। हरिहरेति। हरिर्विष्णुः हराम
हंत अहो घोरपापकारिणा केनापि विप्रलब्धो वराकः विप्रलब्धोवं वितः। आः पापेत्यादिमहिमानमित्यंतं प्रसिद्धं। हरिहरेति। हरिर्विष्णुः हरा म

कापालिकः। ।अरे क्षपणक धर्मं तावदस्माकमवधारय। ।मस्तिष्कान्त्रवसाभिघारितमहामांसाहुतीर्जुह्वतां वह्नौ ब्रह्मकपालकल्पित
सुरापानेन नः पारणा। सद्यः कृत्तकठोरकंठविगलत्कीलालधारोज्वलैरर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः। ।भिक्षुः। ।कर्णौ
पिधाय। बुद्ध बुद्ध अहो दारुणा धर्मचर्या। ।क्षपणकः। ।अर्हंत अर्हंत अहो घोरपापकारिणा केनापि विप्रलब्धो वराको। ।
कापालिकः। ।सक्रोधं। आः पाप पाखंडापसद मुंडितमुंड चंडालवेश केशोलुंचक अरे विप्रलब्ध नः किल चतुर्दश भुवनोत्पत्ति स्थितिप्र
लयप्रवर्त्तयिता वेदांतसिद्धांतप्रसिद्धविभवो भगवान् भवानीपतिः। दर्शयामस्तर्हि धर्मस्यास्य महिमानं। ।हरिहरसुरज्येष्ठश्रेष्ठान्सुरा
नहमानये वियति वहतां नक्षत्राणां रुणध्मि गतीरपि। सनगनगरामंभःपूर्णां विधाय मही मिमां कलशकलितं तत्त्वाततोयं क्षणेन पिबा
मि तत्। ।क्षपणकः। ।अरे कापालिक अतो ब्रवीमि केनापि ऐंद्रजालिकेन मायां दर्शयित्वा विप्रलब्धोसीति। ।कापालिकः। ।आः
पापपुनरपि परमेश्वरमैंद्रजालिकमित्याक्षिपसि। तस्मात्कर्षणीयमस्य दौरात्म्यमिति खड्गमाकृष्य। तदहमस्य॥
हादेवः एतेषु ज्येष्ठाः वयोधिकाः श्रेष्ठाः सामर्थ्याधिकाः ये सुरा देवास्तान् अहमानये धृतसदाम पि स्वभावानयने समर्थोहमिति भावः। वियति
गगने वहतां गच्छतां नक्षत्राणां गतिमपि रुणध्मि किं बहुना नगैः पर्वतैः नगरैः रामधानिभिः सहिता मिमां पृथ्वीं अंभःपूर्णां विधाय जलपूर्णां
कृत्वा ततस्तज्जलं तोयं कलशकलितं घटगृहीतं कृत्वा क्षणेनाविलंबेन पिबामि। एवं च मया सहितस्य भैरवस्योपासकानां सोमसिद्धांति
नामस्माकं भैरवप्रसादेन सामर्थ्यमिति भावः। क्षपणकः। अरे कापालिक अत एव भ्रमणानि केनापि ऐंद्रजालिना मायां दर्शयित्वा विप्र २१
लब्धोसि॥ ॥

एतत्करालकरवालनिकृत्तकंठनालोच्छलद्बहुलफेनिलबुद्बुदौघैः। सार्द्धं भवस्तुभिरहं तव भूतवर्गैर्निर्गलन्तिः रुधिरैः धिनोमि
। ।खड्गमुद्यच्छति। क्षपणकः। ।सभयं। महाभाग अहिंसा परमो धर्म इति भिक्षोरंकं प्रविशति। ।भिक्षुः। ।कापालिकं प्रतिवारयति।
अहो कौतुकप्रयुक्तेवाक्कलहेन युक्तमेतस्मिन्प्रतिनिग्रहः। ।कापालिकः। ।खड्गं प्रतिसंहरति। ।क्षपणकः। ।समाश्वस्य। महाभा
अजदि संहत्तिदद्धोस लोसावेसे संवृत्ते तदो हं किं पि पुच्छेमि। ।कापालिकः। ।पृच्छ। ।क्षपणकः। ।सुदे तुम्हाणं परमे धम्मे अध के लि
से सुक्के व मुक्खे। ।कापालिकः। ।दृष्टं क्वापि सुखं विना न विषयैरानंदबोधोज्झिता जीवस्य स्थितिरेव मुक्तिरुपलावस्था कथं प्राप्य
ते। पार्वत्या प्रतिरूपया दयितया सानंदमालिंगितो मुक्तः क्रीडति चंद्रचूडवपुरित्यूचे भवानीपतिः। ।भिक्षुः। महाभाग अश्रद्धे
यमेतत्। यत्अवीतरागस्य मुक्तिरिति। ।क्षपणकः। ।अरे कापालिक अजदि ण कुप्पसि ता भणामि सलीलो सरागो मुत्तो त्ति विरु
द्धो। ।कापालिकः। ।स्वगतं। अये अश्रद्धाकलितमेतयोरंतःकरणं। भवत्वेवं तावत्। ।प्रकाशं। अहेद तत्तावत्। ततः प्रविशति कापा
लिकरूपधारिणी श्रद्धा।

प्रए एतत्करालेति। अहं गंगै भैरव हितो भैरवो शं किं सुमतराह्वायमानः स्मरसुत्र्ययतः वर्मधरितो मध्ये संततोवाद्यविशेषः तस्य शं कूहति तत्कल्पयाम्यहः
तदाह्वत्तैः तेनाकारितैः भूतवर्गैः पिशाचगणैः तेन सार्द्धं सह रुधिरैः धिनोमि प्रीणयामि। कथंभूतै रुधिरैः एष एवासौ करालभयान
कश्चंद्रकरवालः खड्गः तेन निकृत्तश्छिन्नो यः कंठनालं तस्मादुच्छलंतः पर्यस्ता बहुला ये फेनिला बुद्बुदा येषु तैः। क्षपणकः। महाभाग अ
हिंसा परमो धर्मः। क्षपणकः। यदि महाभाग यदि संहत्तघोररोषावेशः संवृत्तस्तदाहं किमपि पृच्छामि। क्षपणकः। श्रुतो युष्माकं परमो ध
र्मः। अथ कीदृशं सुखं मोक्षश्च परमो धर्म इत्यपहासः। दृष्टं क्वापीति। मृगानीउमा तस्याः पतिः शिव इति कथं वे अवदत् इतीति किं। मुक्तः पा
र्वत्या प्रतिरूपया सदृशया दयितया वल्लभया आलिंगितः सन्सानंदं यथा भवति तथा क्रीडति रमते कीदृशः। चंद्रचूडं वपुर्यस्य ताहशः सोमसि
द्धांते हि मासहितस्येश्वरस्योपासनया तत्सारूप्यरूपा मुक्तिर्भवति। ईश्वरवदेव भवानीसदृशापरिष्वज्यत इति भावः। इतो नान्यो मोक्ष
इत्याह। विषयैः स्रक्चंदनवनितादिभिर्विना सुखं क्वापि न दृष्टं। एवं चाद्वैतवादे च कास्य सुखं निरूपमिति भावः। नैयायिकवैशेषिकयोर्मुक्तेर
प्रार्थनीयत्वेनापुरुषार्थत्वमाह। आनंदबोधोज्झिता सुखज्ञानवर्जिता जीवस्य स्थितिरेव मुक्तिः। कथं प्रार्थ्यते न कथंचित्। उपलावस्थाउपले
न पाषाणेन समाना अवस्था यस्य अशेषात्मविशेषगुणध्वंसो मुक्तिरिति हि तैर्मन्यते। तथा चचेतनत्वं विहाय न हि कश्चिदचेतनत्वं प्रार्थयते इति भावः।

अग्राह्यमनादरणीयमित्यर्थः॥ क्षपणकः॥ अरेकापालिक यदिनरूष्यसितदात्वणाभिशरा। सरागोमुक्तिरितिविरुद्धं। कापा०। करुणा
मसृणिवेकुत्वा। जसाःस्तुताःश्रद्धाप्याएषा। विणिद्दनीलोप्पलजोलजीवनामरालिक्षिमालोहतचारुस्तनभारमंथरावि
नातिक्षुर्योदुमुखा विलासिनी। क्षपणकमतेभिक्षुकमतेच। आत्मनःपरिछिन्नत्वस्वीकारात्श्रद्धाआवरणत्वरुपावायाःश्रद्धायास्तामस
त्वं। सोमसिद्धांतस्यकाम्यनाप्रधानत्वात्राजसीत्वमित्यवधेयं। श्रद्धा। एषास्मिआणापयउत्तामी। जनांतिकं। लोकाविदितेअवददि
सीत्वं। सोमसिद्धांतस्यकामनाप्रधानत्वात्राजसीत्वमित्यवधेयं। पीनपयो
तिशोषःरंगइति। मयावंशानुरागात्गुजदंडेनपाडितोमर्दितस्तनभरोयस्यांक्रियायांयथाभवतितथागाढंचयथाभवतितथापीनपयो
धरामांसलऊवांरंगः। कतिकियत्संख्यानोआलिंगिता। अपितुआलिंगिताएव। ननुकिंतत्राह। शतशःबुधेभ्यःशपेशतशोगुरुशप
करुणा। सखिश्रेद्धेकवयस्ससुदायसद्धा। जाएसा। विणिद्दनीलुप्पलजोअजोअणाणंलक्षिमालोकदच्चारुत्तूषणा। ति
अंबपीणत्थणभालमंथला विणादिपुलिंडमुहीविलासिणी। श्रद्धा। परिक्कम्य। एसम्हिआणवेउस्सामी। कापालिकः
जनांतिकं। प्रियेएनंदुरभिमानिनंभिक्षुंतावद्गृहाण। श्रद्धा। भिक्षुमालिंगति॥ भिक्षुः। सानंदंपरिष्वज्य। रोमांचमभिनी
य। अहोसुखस्पर्शाकापालिनी। तथाहि। रंडाःपीनपयोधराःकतिमयाचंडानुरागाद्भुजद्वंद्वापीडितपीवरस्तनभरंगाढंम
लिंगिता। बुद्धेभ्यःशतशःशपेयदिपुनःअत्रापिकापालिनीपीनोत्तुंगकुचावगूहनभवःप्राप्तःप्रमोदोदयः। अहोपुण्यंका
पालिकचरितं। साध्यःसोमसिद्धांतः। आश्चर्योयंधर्मः। भोमहाभागसर्वथाबुद्धानुशासनमुत्सृज्यप्रविष्टोपारमेश्वरसिद्धां
तं। तदाचार्यस्त्वंशिष्योहंप्रवेशयमांपारमेश्वरींदीक्षां। क्षपणक। अलेभिक्खुआकावालिणीफंसदूसिदत्तंदूलेअवसल।
भिक्षुः। आःपापवंचितोसिकापालिन्याःपरिरंभमहोत्सवेन। कापालिकः। प्रियेक्षपणकंगृहाण। कापालिनी। क्षपणक
मालिंगति। क्षपणकः। सरोमांचं। आःअलिहंतकावालिनीफंससुहंसुंदलिदेहिदावपुणोपिअंकवालिं। कापालिनी। तथाकरोति।
धंकरोसि। यदिपुनःअत्रापिकापालिन्याःपीनौमांसलावुत्तुंगावत्यक्षौयौकुचौताभ्यामवगूहनंआलिंगनंतेनतवअत्यन्तःप्रमोदो
दयः। सुखाविर्भावःप्राप्तस्तदेत्यर्थः। क्षपणकः। अरेभिक्षुककापालिनीस्पर्शदूषितस्त्वंदूरमपसर। क्षपणकः। आःअर्हंतकापा
लिनीस्पर्शसुखंसुंदरिदेहितावत्पुनरप्यंकपालीं। २२

प्र
क्षपणकः। अरेमहानयंखल्विंद्रियविकारःउपस्थितः। तत्किंअनयामयूरपिच्छिकयाछादयिष्यामि। अयिपीनघनस्तनशोभनेपरिश्रेस
ऊरंगसुलोचने। यदिरमसिकपालिनिश्रावकीतत्किंकरिष्यतिश्रावकी। यदित्वंरमसितदाश्रावकीश्रद्धावतीश्रावकीकिंकरिष्यतिनकिमपी
त्यर्थः। अहोकापालिकदर्शनमेवएकंसौख्यमोक्षसाधकं। भोआचार्य। अर्हतवकुलस्यसांप्रतंदासःसंवृत्तः। मामपिमैरवानुशासने
दीक्षस्व। अस्मादनगवत्प्रवर्तितंसुरयासंजनं। इदमितिभैरवेरितंभैरवप्रोक्तंपशूनांप्राणिनांपाशःअनादिवासनारूपःतस्यसमुच्छेदेन।
क्षपणकः। अलेमहंतेखुईदिअविआलेउपछिदे। ताकिंअअउउदंगोउपिछिआएठंकिस्सं। तथाहि। अयिपीणघणत्थ
णसोहणी पलिलंभऊरंगसुलोअणी। जइरमसिकपालिणिभावकीताकिंकलिस्सदिसावकी। अहोकावालिअदंसणंजे
वएकंसोक्खमोक्खसाहणं। भोआचालिअ हगेअरुहकुलिकेसंपदंदासेसंवुत्ते। मंपिमहाभैरवाणुसासणेदिक्खेस्स। कापा
लिकः। उपवेश्य। ताभ्युभौतथाकुरुतः। कापालिकः। ध्यानंनाटयति। श्रद्धा। भअवंसुलासंपुलाणं भा
णं। कापालिकः। विलोक्यपात्रशेषंभिक्षुक्षपणयोरर्पयति। इदंपवित्रममृतंपीयतांभवभेषजं। पशुपाशसमुच्छेद
कारणंभैरवेरितं। उभौविमृशतः। क्षपणकः। अम्हाणंअलिहंताणुसासणेसुलापाणंणत्थि। भिक्षुः। कथंकापालि
कोच्छिष्टांसुरांपास्यामि। कापालिकः। विमृश्यजनांतिकं। श्रद्धेपशुत्वमनयोर्नाद्यापिअपनीयते। तेनास्माकंवदनसंसर्गदो
षात्अपवित्रांसुरामेतौमन्येते। तद्भवतीस्ववक्त्रासवपूतांकृत्वाअनयोरर्पयतु। यतस्तीर्थिकाःपठंति। स्त्रीमुखंसदाशुचीति। का
पालिनी। श्रद्धा। जंअवंआणवेदि। पानपात्रंगृहीत्वापातशेषंउपनयति। भिक्षुः। महाप्रसादइतिचषकंगृहीत्वापिबति।
अहोसुरायाःसौंदर्यं। निपीतावेश्याभिःसहकतिनवारान्सुवदनामुखोच्छिष्टास्माभिर्विकचबकुलामोदमधुरा। कपालिन्यावक्त्रा
सवसुरभिमेतांउन्मदिरामलक्षाजानीमःस्पृहयतिसुधायैसुरगणः।
रोकारणं। विमृशतःविचारयतइत्यर्थः। क्षपणकः। अस्माकमर्हदनुशासनेसुरापानंनास्ति। पशुत्वंमूर्खत्वमित्यर्थः। स्ववक्त्रासवपूतांस्व
मुखेआसवःतेनपूतांपवित्रां। तैर्थिकाःस्मार्ताःइत्यर्थः। श्रद्धा। यत्भगवानाज्ञापयतीति। निपीतावेश्याभिरिति। अस्माभिर्वेश्याभिःसह
कतिवारान्नपीतासुरेतिशेषः। अपितुबहुधापातेतिशेषइत्यर्थः। कीदृशीसुरासुवदनानांसुमुखानांमुखेनउच्छिष्टा। पुनःकीदृशी। विकचंफुल्लं
यद्बकुलंतस्यामोदेनमधुरा। ततःअनंतरंकिमायातमित्यतआह। सुरगणइंद्रादिगणएतांप्रत्यक्षांसुरामलब्ध्वाअप्राप्यसुधायैअमृतायस्पृहय

वांछतिइतिजानीमः। कीदृशा कपालिन्या वक्त्रासवेन मुखमधेन सुरभितुर्गंधिद्रव्यमनेकशः कामिनीमुखोच्छिष्टायाः सुरायाःपानेन एवं बु
द्धिरूत इदानीमेतदास्वादनेन एषातु द्विजातिति कापालिकसुरापाक्रातिमाहात्म्यमितिभावः। क्षपणकः। अरे भिक्षुकमासवैर्पिव
कपालिनीवदनोच्छिष्टां सुरां ममापि धारयस्व। क्षपणकः। अहो सुरायामकत्वं। अहो स्वादः। अहो गंधः। अहो मरमीचं। चिरं खलु अ
र्हदनुशासने पतितो वंचितोस्मि ईदृशेन सुरारसेन। अरे भिक्षुक घूर्णंति मम अंगानि तत्स्वप्स्यामि। क्षपणकः। अरे भिक्षुक एष
कापालिकः अथवा एष आचार्यः कापालिन्या सार्द्धं शोभनं नृत्यति तदेतान्यौ सत्त्वाबाम पिन्नृत्याव। क्षपणकः। अपिपानघ
नेति पूर्वोक्तमितिभावः।
वं: क्षपणकः। अरे भिक्षुक आमासर्द्धपिष्ट कावालिणी वक्त्रगुच्छिष्टं सुरंमं पिधालेसु। भिक्षुः। क्षपणकाय ददकमुप
नयति। क्षपणकः। पीत्वा अहो सुराखेमकुसत्तणं। अहोसादो अहोगंधो अहो सुरहित्तणं चिरं खु अलिहंता णुसा
सणे पडिदे वंचिदोम्हि ईदिसेण सुरालसेण। मदमभिनीय। अलेभिक्खु अ घुम्मंति मे अंगाइ ता सुविस्सं। भिक्षुः। एवं
क्रियतेतथाकुरुतः। कापालिकः। प्रिये अमूल्यक्रीतंदासद्वयंलब्धं। तन्नृत्यावस्तावत्। तदनेनृत्यतः। क्षपणकः। अले
भिक्खु आ एसे कावालिके ये अधवा एसे आचालिए सद्धं सोहणं आबेदिता एदाए सद्धं अम्के पिणच्चम्ह। भिक्षुः। एवं
क्रमेः। मदस्खलितं नृत्यतः। क्षपणकः। अपिपीणघणत्थणि सोहिणी इत्यादिगाय विनृत्य तिच। भिक्षुः। आचार्यमहा
स्वयमेतद्दर्शनं। यत्राक्लेशमभिमतार्थसिध्दयः संपद्यंते। कापालिकः। किमिदमाश्चर्यं पश्य। अत्रानुक्तिनवक्तरादिवि
षयासंगेपि सिध्यंत्यस्मत्त्वासन्नमहोदयप्रणयिनामष्टौ महासिद्धयः। वश्याकर्षणमोहनद्भमयनभद्रोज्ञणोच्चाट
नाद्याः प्राकृतसिद्धयश्च विदुषां योगांतरायाः परं। क्षपणकः। अले कावालिअ। विमृश्य। अले आवालिआ। अधवा अले आवालिआ अले। ।
अत्रानुक्तिलेति। अत्रास्मिन्मते अनुक्तिः अत्यक्तवस्तुरादीनामिंद्रियाणां विषयासंगो विषयसंबंधस्तस्मिन्नप्यष्टौ महा
सिद्धयः अणिमाद्याः प्राकृतसिद्धयश्च सिध्यंति परं तु योगिनां हानिर्नायोगांतरायायोगविघ्नरूताः। कथं रूतानां विदुषां अत्यास
न्नोतिनिकटः महोदयो मोक्षस्तस्मिन्प्रणयिनां घातिमतां। कथं रूताः प्राकृतसिद्धयः वश्याकर्षणप्रद्योतनोच्चाटनानिद्याया निप्रमु २३
खानिद्यासां ताः। वश्यादिप्रमुखाइतिभावः। क्षपणकः। अरे कापालिकविमृश्य अरे आचार्य अथवा आचार्यराजकुल।

दूरं अतिशायेनेत्यर्थः। क्षपणकः। आचार्य इदं पृच्छामि याहशी युष्माकं सुराया आहरते सिद्धिः किं ताहशी त्वम् कुरुषे इति। विद्याधरीमिति। वि
द्याधरी गंधर्वांतरजातीयकन्या सुरांगनादेवकन्यामित्यर्थः। नागांगनां सर्पकन्यां यक्षकन्यां यक्षाः कुबेरस्य धनरक्षकाः अनुचराः
स्त्रियमिति। किं वस्तु मात्रमाकर्षितुं शक्नुत इत्याह। यद्यदिति। बलादाकर्षणविद्यावलादित्यर्थः। क्षपणकः। नोइदं मया गणितेन ज्ञातं।
यस्यैवं वर्यं महामोहस्य किं करोति। क्षपणकः। तद्राजकार्यं किम पिमंत्रयते। क्षपणकः। सत्त्वस्य सुतायं धाम हाराजस्यास्तया आक्षेप
तामिति भवते विशेषः। अंबागतं अत्र विषयमित्यर्थः। आलापसंवादः। करुणा। सखि एवं कुर्वः।
भिक्षुः। विहस्य। अयमनन्यासादितपीतपावदनमदिरया दूरमुन्मत्तो हतात पत्स्वात क्रियतामस्य मदापनयनं। का
पालिकः। एवं भवतु। स्वमुखोच्छिष्टं तांबूलं क्षपणकाय ददाति। क्षपणकः। स्वस्थीभूय आचालिअ एदं पुच्छेमि जा
दिसी तुम्हाणं सुलाए आहलणसिद्धी किं तादिसी इत्थि अपुलिसेसु विकाच्छि। कापालिकः। किं विशेषेण एतु सि। पश्य।
विद्याधरीं वा यक्षांगनां वा नागांगनां वाप्यथ यक्षकन्यां। यद्यन्ममेष्टं भुवनेच येस्मिन्विद्याबलात्तन्नउपाहरामि। क्ष
पणकः। जोएदं मएगणिदेण जाणिदं। जं सव्वे अम्हे महामोहस्स किंकलान्ति। कनौ। यथा ज्ञातमायुष्मता एवमेतत्। ।
क्षपणकः। लाला अकम्मं किंपि मंतीअदि। कापालिकः। किं तत्। क्षपणकः। सत्त्वस्स कुदसद्धामहालाअस्स आसा
एआहरणीअदि। कापालिकः। क्वासौदास्याः पुत्री एषता मेव विद्याबलादुपाहरामि। क्षपणकः। खटिकामादायगण
यति। शांतिः। सखि अंबागत मिवहताशानामाजा पंचप्रणमितदवधानेन तावदाकर्णयावः। करुणा। सखि एवं करेम्ह तया
कुरुतः। क्षपणकः। गायंगणयित्वा दिष्ट्या। णत्थि जलेण त्थि थलेण त्थि गिलिगव्हलेसु णत्थि पाआले विहुमत्ती एस हिद
वरावसदिहिअए महप्पाणं। करुणा। सानंदं। सहि दिट्ठिआ वढ्ढसे विहुमत्ती एदेवा एपासपरिवत्तिणी सद्धेति। शांतिः ह४
क्षपणकः। गाथां गद्यपद्यमयीं भाषां निर्मितं ज्योतिर्ग्रंथं। नास्ति जलेनास्ति स्थलेनास्ति गिरिगह्वरेषु नास्ति पाताले विष्णुभक्ति सा स
हितावसति हृदये महात्मनां। करुणा। सखि दिष्ट्या वर्द्धसे। दिष्ट्या नाम्येन। विष्णुभक्त्या देव्याः पार्श्ववर्तिनी श्रद्धा इति। क्षपणकः।
नास्ति जलेनास्ति स्थलेनास्ति गिरिगह्वरे विवरे नास्ति पाताले विष्णुभक्तासहितावसति हृदये महात्मनां।
४ दीनादयति। भिक्षुः। अधर्मस्य कामादपक्रांतस्य कुत्रप्रकृतिः। क्षपणकः। पुनर्गणयित्वा णत्थि जलेण त्थि थलेण त्थि गिरिविवरे णत्थि पाआ
ले विहुमत्ती एस हिदोवसदि हिअए महप्पाणं।२०

देविमूलमिति। विष्णुभक्तिः निद्ध्येविद्योत्पत्तये मूलं आदिकारणं। तां विष्णुभक्तिं। सा च कन्या सात्विकी श्रद्धा। शांतिसहिता अनुव्रता अ
नुगतेत्यर्थः। तत्र तयोर्निकिरेकामान्मुक्तः कामरहितो धर्मः न वेद्मि तदानन्दसिद्धि विवेकस्य साध्यं सिद्धिं मन्ये निःकामकर्मानुष्ठानशीलेन
सात्विकश्रद्धोपेतविष्णुभक्तेः क्रियमाणयामनवरूपं विन्ते श्रद्धया नवितर्यं। ततश्च विवेकेनावश्यं विद्योत्पत्स्यत इति भावः। अनुव्ययेना
सात्विकश्रद्धोपेते विष्णुभक्तौ क्रियमाणायामनवरूपंविघ्नेश्रद्धयानवितर्यं। ततश्चविवेकेनावश्यंविद्योत्पत्स्यतइतिभावः। श्रस्तुव्ययेना
पिप्राणात्ययेनापि। व्यवसितमुद्योगमित्यर्थः॥ ॥इति श्रीनावविश्वनाथदाक्षितसूनुगणेशानद्दविरचितायां प्रबोधचंद्रोदयटीका
यांद्वितीयोंकः॥ ॥इदानींपाखंडिप्रेषितमहाभैरवीतरशांत्यासावधानीकृतया विष्णुभक्त्या त्रातो श्रद्धाधर्मावितिसूचयन्नाह।

कापालिकः। सविषादं। अहो महत्कष्टमापतितं महाराजस्य। तथाहि। देवीमूलं सिद्धये विष्णुभक्तिस्तां च श्रद्धानुव्रता सा
च कन्या। कामान्मुक्तस्तत्र धर्मो न वेद्मि सिद्धिं मन्ये तद्विवेकस्य साध्यं॥ ॥तथापि तावदस्तु व्ययेनापि प्राणिनः प्रयोजनमनुष्ठे
यं। तन्महाभैरवीं विद्यां धर्मश्रद्धयोराहरणाय प्रेषयामः। इति निष्क्रांताः सर्वे। शांतिः। आवामप्येतद्वृत्तांतं व्यवसितं देव्यै
विष्णुभक्तये निवेदयावः। इति निष्क्रांते॥ ॥इति श्रीकृष्णमिश्रविरचिते प्रबोधचंद्रोदये पाखंडविडंबनो नाम तृतीयोंकः॥ ॥ततः
प्रविशति मैत्री। श्रुतं मया मुदितासकाशात् यथा महाभैरवीग्रासनसंभ्रमादौ तत्र वरा विष्णुभक्त्या परित्राणं दापि श्रस्तु
स्त्वेति। ताइर्क्कंठि देण हिअअएण पिअसहिं पेक्खिस्सं। इति परिक्रामति। ततः प्रविशति श्रद्धासभयोत्कंपं। घोरांतां ज्वलकपा
लकुंडलवतीं विकटा दंष्ट्रिनिर्मुक्तांतां विकरालमूर्तिमनलज्वालाविशंगोकचैः। दंष्ट्राचंद्रकलांकुरांतरजलज्जिह्वां महाभैरवीं
पश्यंत्याइव मे मनः कदलिकेवाद्याप्यहो वेपते। ।
ततः प्रविशति मैत्री। श्रुतं मया मुदितासकाशाद्यथा महाभैरवीग्रसनसंभ्रमात् भगवत्या विष्णुभक्त्या परित्राता प्रियसखी श्रद्धे
ति। ग्रसनसंभ्रमात् गिलनसंभ्रमात् इत्यर्थः। तदुत्कंठितेन हृदयेन प्रियसखीं प्रेक्षिष्ये। घोरांतामिति। अद्यापि मे मनो श्रद्धा वेपते कं
पते। तत्र दृष्टांतः। कदलिकेव कदलीदिकंपमानास मूलशाखं कंपते तद्वत् कंपत इति भावः। न यहेतुत्वभावे पिनदारोपणे कंपत इति
आह। कीदृशीं इव विष्णुभक्त्याहूता अतापि महाभैरवीं पश्यंत्याइव। इत्यस्वेच्छापूर्वकं इदानीं वसनमेव भयमिति दर्शितं। कथंभूतां
महाभैरवीं घोरां भयानकां। पुनः कथंभूतां ज्वलकपालकुंडलेयस्याः सा तादृशीं। पुनः कीदृशीं दृष्टिनिर्मित त्रिनयनलाघवं विकटदंष्ट्रां विकरा
लामूर्तिं वंती। पुनः कीदृशी अनलज्वालावत् पिशंगैः कचैः केशैः विकराला अतिनयावहामूर्तिः स्वरूपं यस्याः सा तां। कीदृशी
दंष्ट्राएव चंद्रकलांकुरा तदाकारस्तासामंतरे मध्ये लल जिह्वां। ।

मैत्री। अयेएणमे प्रियसखी श्रद्धा भयसंभ्रमात् भ्रांतहृदया कदलिकाकंपतरलैरंगैः किमपि मंत्रयंती मत्सुखादागतामपि मां न लक्ष
यति। कदलिकाकंपवत्पताकाकंपवत्तरलैश्चंचलैरंगैरित्यर्थः। रंभापद्मे च कदलीपताकामृगभेदयोरिति मेदिनीकारः। तदालपिष्यामि
तावत्। प्रियसखि श्रद्धे किमिति त्वमुन्नापितहृदया मामपि न विलोकयसि। सदुःखं श्रद्धा निवेदयति। कालरात्रेति। कालरात्रे रिव भैर
व्याः करालास्यनपानकमुखदंतांतर्गतया मया भोस खि पुनः अत्रैव जन्मनि सेवत्वया दृष्टं दृष्टासीत्यर्थः। पुनः दृष्टासि। मैत्री। सखि
तथा विष्णुभक्तिर्निर्भर्त्सित भग्नावाघाघोरदर्शनाया महाभैरव्याः किमिति ते श्रद्धा पिवेपते अंगानि भैरव्याः सकाशादित्यर्थः। घो
रांतामित्यादि। घोरांतां ज्वलकपालकुंडलवतीमिति पूर्वोक्तं श्लोकमित्यर्थः। अहो हताशा घोरदर्शना। अथ तया किं कृतं। आगतया

मैत्री स्वगतं। अयेएसा मे पिअसही सद्धा भयसंभमादो भंतहिअआ कदलिआकंपतरलेहिं अंगेहिं किंपि मंतअंती मं मु
हादागदं पि मं ण लक्खेदि। ता आलविस्सं दाव। प्रकाशं। पियसहि सद्धे किं ति उमंगा विलहिअआ मंपि ण विलोएसि।
श्रद्धा। विलोक्य। सोच्छ्वासं। अयेप्रियसखि मैत्रि कालरात्रिकरालास्यदंतांतर्गतया मया दृष्टासि सखि सेव त्वं पुनरत्रै
व जन्मनि तदेहि गाढं परिष्वजस्व मां। मैत्री। तथा हृत्वा। सहि तधा विष्णुभक्तिणिब्भच्छिदप्पहावाए घोलदंसणाए महा
भैरवीए सकासादो अकंदिदे वादे ते अंगाइं। श्रद्धा। मित्यादि पठति। मैत्री। सत्रासं। अहो हदासा घोलदंसणा।
अधताए आगदाए किं कदं। श्रद्धा। शृणु। श्येनावपातमभिपत्य करेण सा मामादाय धर्ममपरेण करेण घोरा। वेगेन
सा गगनमुत्पतिता नखाग्रकोटिस्फुरत्पिशितपिंडयुगेव गृध्री॥ मैत्री। हद्धी। इति मूर्छति। श्रद्धा। सखि समाश्वसिहि।
मैत्री। आश्वस्य। तदो२। श्रद्धा। ततः परमस्मदार्तनादोपजातदयार्द्रया देव्या विष्णुभक्त्या। भ्रूभंगभीमपरिपा
टलदृष्टिपातमुग्राटकोपकुटिलं वतयाव्यलोकि। सा वज्रपातहतशैलशिलेव भ्रमावाभग्नजर्जरशिरोस्थियथा पपात। ।
नद्राते श्येनावपातमिति। सा घोरा श्येनवद्यपातोयस्यां क्रियायां यथा तथा अभिपत्य अस्मदुपरि पतित्वा स्थिते तिशेषः। अन्यथासत्यस्य
अनन्वयापातात्। सा करेणसमादाय अपरेण अन्येन करेण धर्ममादाय तरसा वेगेन गगनं उत्पतिता ऊर्ध्वंगतेत्यर्थः। अभिपत
त्यतनक्रियाभेदेन सेतिदृष्टं पोजनीयं। अन्यथा कीदृशी सा सा भुक्तसिद्ध्यर्थः। ऊर्ध्वपतने दृष्टांतमाह। गृध्रीव। कीदृशी। नखाग्रकोटिस्फुरत्
दृश्यमानं पिशितपिंडयुगं मांसपिंडयुगलं यस्याः सा तथा। मैत्री हाधिक्। मैत्री। तदा तदा। भ्रूभंगभीमेति। विष्णुभक्त्याभ्रूभंगेन भक्ता

तयाग्नीमःपाटलःश्वेतरक्तोदृष्टिपातोयस्यांक्रियायांयथाभवतितथाहमतिशयेनयाकोपक्तेनकुटिलंयथाभवतितथेति।इयंक्रियावि
शेषणंतथातेनप्रकारेणअवलोकिआलोकितंतथाकथमित्यपेक्षायामाह।यथायेनप्रकारेणसाभैरवीचंडीभोआसमंतात्नग्न
नजर्जरंविशीर्णंशिरोस्थिशिरःखर्परंयस्यांक्रियायांएवंपपातेत्यर्थः।तत्रदृष्टांतःवज्रनिपातेनहतायतशैलस्यपर्वतस्यशिलेव।मैत्रीदि
ष्ट्याहंग्रीवकुंधराडूलमुखादिभ्रष्टाद्धेमेणजीविताप्रियसखीशार्दूलमुखाघाप्रवक्त्रादित्यर्थः।ततस्ततःसंज्ञातोभिनिवेशोभिमा
नोयस्यांक्रियायांयथाभवतितथात्तकमित्यर्थः।ततःकामादिषुजितेष्वित्यर्थः।यथासमयंयथोपदिष्टकालंप्राणायामःनामको
र्तनंएवमादिनामनुवर्त्तनेनअभ्यासेनभवसैन्यंवस्तुविचारादिभिरनुग्रहिष्यामः।तदुक्तंश्रीमच्छसिंहाभसैः।नित्यादिनिराधि

मैत्री। ।दिष्ट्याभिगीवकुंधसहूलमुहादोविनष्टारवेमेणजीविदापिअसही।तदोर। ।श्रद्धा। ।ततोदेव्यासमुपजनिताभि
निवेशमुक्तंएतस्यदुरात्मनोमहामोहहतकस्यमामप्यवशायप्रवर्त्तमानस्यसमूलमुन्मूलनंकरिष्यामि।आदिष्टाचाहंदे
व्यायथागच्छश्रद्धेहि विवेकं कामक्रोधादीनांनिजव्यापारक्षिप्ततांततोवैराग्यप्रादुर्भावोभविष्यति वयंचयथासमयंप्रा
णायामाद्यनुवर्त्तनेनपुष्पसैन्यमनुग्रहिष्यामः।कुंतंनरादयश्चदेव्याःशांत्यादिकौशलेनोपनिषद्देव्यासंगतस्यभवंगतोवि
वेकस्यप्रबोधोदयमनुध्यास्यंतितदहनिदानींविवेकसन्निधिंप्रस्थिता।त्वंपुनःकिमाचरंतीदिवसाननुवाहयिष्यसि। ।
मैत्री। ।अम्हेविविक्कुतलीएआसाएवतस्सोबद्धिणिआउविवेआसिद्धिकालएणामहुप्याएहिअएवसामोसंस्कृत
माश्रित्य।तथाहि। ।ध्यायंतिमांसुखिषुनिःखिनिवानुकंपांपुण्यक्रियेषुमुदितांकुमतावुपेक्षां।एवंप्रसादमुपयातिहिरा
गलोभद्वेषादिदोषकलुषोप्ययमंतरात्मा। ।तदेवंवतस्तोभगिन्योवयंतदभ्युदयकारणेनैववासरान्नयामः।कुत्रेदानीं

कृतंसत्वंविजसिसाकृतंनयथाप्रहेत्यर्थः।प्राहाकृतंनरावेदेतिपतंजलिः।शांत्यादिरूपेणकौशलेनसम्यक्साधनेनअनुदिध्या
स्यंति।अनुअविद्यावृत्तावरणनिरत्यनिरंतरसंपादयिष्यंतीत्यर्थः। ।मैत्री। ।वयमपिविवेकस्यकालतयावततस्तोभगिन्यःविवेकसि
द्धिकारणेनमहात्मनांहृदयेवर्त्तामिः।संस्कृतमाश्रित्यमैत्रीवदतीतिशेषः।महात्मनांहृदयेस्थितिंदर्शयति।तथाहि।ध्यायंतीति।तेमहात्मा
नःसुखिनिजीवेमांमैत्रीध्यायंतिचिंतयंति।दुःखिनिअनुकंपांतेध्यायंतीत्यनुषंजनीयं।सर्वत्रपुण्यक्रियेषुमुदितांकुमतौउपेक्षां।तत्रैवंसति २५
कातेषांसिद्धिःअतआह।एवंसतेअयंअंतरात्माप्रसादंप्रसन्नतामुपयातीति।ननुस्वभावप्रसन्नस्यकाप्रसन्नताइत्याशंक्याह।रागलोभ
द्वेषादिदोषैःकलुषीकृताअकलुषोपिकलुषःसंपादितइत्यर्थः।मीमांसानुरागतयाभद्वाकारशास्त्रानुसारिण्याकुलेनांतरात्मनाउपनिषद्विरह
दिति भावः॥ ।

मैत्री। तदहंउप्रियसखीअहमपिस्वकंनियोगमनुतिष्ठामि।शांतेइति।महाजनःशांतेनिरुपद्रवेअनंतमहिम्निनिःसीमवैभवेनिर्मलचिदानंददे
हेद्वियादिभ्यदोषरहितंस्वप्रकाशंयस्तरंगरूपेतरंगावलिःउच्चावचविकारपरंपरातयानिर्मुक्तेरहितेएवंभूतेअमृतसागरेभ
सिपरब्रह्मसमुद्रजलेमग्नोपितन्मयत्वान्मनागीषदपिनावामतिनपिबतिनानुभवति।यावत्।निःसारेकार्याक्षमत्वात्मृग
तृष्णामध्याह्नार्कमरीचिकास्तत्रकल्पितेअर्णवजलेसमुद्रजलेभ्रांतःतरंगमगतिलिप्सुःअलंपिबतिपानानुकूलव्यापारंकरो तिं
तीत्यर्थः।आधावतिअवगाहते।आलोडनानुकूलव्यापारंकरोतीत्यर्थः।अभिरमतेजलतालभ्रांत्याभज्जतिमज्जनानुकूलव्यापारंकरोति
त्यर्थः।अथउन्मज्जतिउन्मज्जनानुकूलचेष्टावान्मज्जनसंभावनमियेतिभावः।

प्रियसखीमहाराजमालोकयिष्यति। ।श्रद्धा। देव्यैवंदमुक्तं।अस्तिराढाभिधानोजनपदः।तत्रभागीरथीपरिसरालंकार
भूतेचक्रतीर्थेमीमांसानुरागतयामत्याकथंचिद्धार्यमाणप्राणोव्याकुलेनांतरात्मनाउपनिषत्संगमार्थीविवेकस्तपस्य
तीति। ।मैत्री। ।तागच्छदुप्पिअसही।अहंपिसकंणियोगमणुचिठ्ठामि। ।श्रद्धा। ।एवंभवतुइतिनिष्क्रांते। ।प्रवेशकः। ।ततः
प्रविशतिराजाविवेकःप्रतीहारीच। ।राजा। ।आःपापमहामोहहतकसर्वथाहतस्त्वयायंमहाजनः।यतः। ।शांतेऽनंतमहिम्नि
निर्मलचिदानंदेतरंगावलीनिर्मुक्तेऽमृतसागरेंभसिमनाङ्मग्नोपिनाचामति।निःसारेमृगतृष्णिकार्णवजलेभ्रांतोपि
मूढःपिबत्याधावत्यवगाहतेऽभिरमतेमज्जत्यथोन्मज्जति। ।अथवासंसारचक्रवाहकस्यमोहस्यप्रबोधोमूलं।तस्यचतत्व
प्रबोधादेवनिवृत्तिः।यतः। ।अमुष्यसंसारतरोरबोधमूलस्यनोन्मूलविनाशनाय।विश्वेश्वराराधनबीजजाततत्वप्रबोधान्नपरो
स्त्युपायः। ।जायच्चहतिनामर्थेदेवायांतिसहायतामितितत्वविदोव्याहरंति। ।

एतद्वयमप्यसमनुपपन्नं।नहिजलत्त्वभवत्यानावमनावगाहनमज्जनोन्मज्जनक्रियाःस्वरूपतःसंभवंति।उक्तव्याख्यानेतुन
दोषः।खानाद्यसंभवेपितदनुकूलचेष्टायाःक्रियमाणायाःदर्शनात्।मयनिर्मितसभायांदुर्योधनेप्रसिद्धत्वात्।एवंचनित्यप्राप्तब्र
ह्मानंदईषदप्यजानन्मृगतृष्णिकारूपसंसारसुखार्थंआयासंकुर्वन्मज्जनोन्मज्जनेवंचितइतिभावः।अबोधःअज्ञानंमूलमादिकारणं।अ
मुष्येति।अमुष्यइदानीमनुभूयमानसंसारएवतरुःवृक्षस्तस्य।अबोधोऽज्ञानंमूलंयस्येत्यर्थः।उन्मूलनेनविनाशनायसवासनमिथ्या

ज्ञानसहितसंसारोच्छेदायविश्वेश्वरस्य।आराधनंसेवनंश्रवणमननादिरूपंतदेवबीजमुत्पादनसामर्थ्यात्तस्मात्क्वातोयस्तत्वबोधस्तत्वसा
क्षात्कारस्तस्मात्परअन्यअपायेनसाध्यमुद्दिश्यसाधनानिनिरूपयति।आयन्वेति।तत्रआयश्चेत्यादिनाउत्साहशक्तिः।तथाचेत्यादि
नाप्रभुशक्तिः।तत्रेत्यादिनासहायशक्तिरितिसंक्षित्रयस्तामग्र्यंदर्शितं।प्रतिहारी।आर्ज्ञापयतिदेवो।आज्ञापयतिविदविधाभिमानिनीदेवावेद
वनीसेवानप्रतिहारी।निर्विचारंयःसौंदर्याभिमानस्तेनवर्द्धितुः।हृद्दिशाजःएतादृशेनअथेवेति।असुंदरेसुंदराभिमानस्यमोहैकसाध्यत्वा
दितिभावः॥

तथाचदेव्याविष्णुभक्त्यासंदिष्टंउद्योगःकामादिविजयविषयेक्रियतामितिअहमपिनवदर्थंगृहीतपक्षेतितत्रकामस्तावत्प्रथमोवी
रोवस्तुविचारेणैवजीयतेनच्यवउतमेवतद्विजयार्थमादिशामि।वेदवतिआहूयतांवस्तुविचारः।प्रतीहारी।जंदेवोआणवेदि
इतिनिष्क्रम्यवस्तुविचारेणसहप्रविशति।वस्तुविचारः।अहोनिर्विचारसौंदर्याभिमानवर्द्धिष्णुनाकामरूतकेनवंचितंजगत्।
अथवामोहेनदुरात्मनैव।तथाहि।कांतेत्युत्पललोचनेतिविपुलश्रोणीभरेत्युन्नतोन्मीलत्पीनपयोधरेतिसुमुखांभोजेतिसुभ्रू
रिति।दृष्ट्वामाद्यतिमोदतेभिरमतेप्रस्तौतिविद्वानपित्वग्द्भिन्नविपुत्रिकांस्त्रियमहोमोहस्यदुश्चेष्टितं।अपिच।यथावस्तुवि
चारयतामंदमतीनांमपिपिशितपंकावनद्धास्थिपंजरमयीस्वभावदुर्गंधिबीभत्सवेषानारीतिनविरमेतिः।तदत्रविस्पष्टएवेतरगुणाध्यासः।

कांतेति।अहोमोहस्यदुश्चेष्टितं।तत्किमेतदाह।विद्वानपिपठितशास्त्रोपित्वग्द्भिन्नविपुत्रिकांस्पर्शविषयत्वादिपूर्णत्वादेतादृशीं सै
स्त्रियंदृष्ट्वाइतिप्रस्तौति।इतीति।किं।कांतेतिउत्पललोचनेति।विपुलोः तिस्थूलःश्रोणीभरोनितंबभारोयस्यास्तयेति।उन्नतौमीलंतौ
पयोधरौस्तनौयस्याःसातथेति।सुष्ठुमुखमेवअंभोजंकमलंयस्याःसातथेति।सुष्ठुभ्रूर्वायस्याःसातथेति।नकेवलंप्रस्तौतिकिंतु
माद्यतिमत्तोभवति।मोदतेहृष्टोभवति।अभिरमतेतयासहक्रीडति।वस्तुस्वभावमनतिक्रम्येतियथावस्तु।अमंदमतीनांतीक्ष्ण
बुद्धीनांपिशितस्यमांसस्यपंकेनकर्दमेनअवनद्धंसंबद्धंअस्थिपंजरंतन्मयीतत्प्रधानास्वभावेनदुर्गंधिबीभत्सावेषोयस्याःसा
नारीतिनास्तिविरतिर्वैराग्येमानसमित्याश्चर्यकरंमोहस्यदुश्चेष्टितमितिभावः।ननुकथंतर्हितद्बुद्धिरित्याशंक्यअन्यगुणारोपादित्या २६
ह।तदत्रेति।अत्रनार्यांइतरगुणाध्यासःअन्यगुणारोपइत्यर्थः।आरोपनिमित्तबुद्धिंदर्शयति।

तथाहिमुक्ताहारलतेति।अहोअल्पमतिभिःस्वल्पबुद्धिभिःएतत्सर्वंनार्यांकल्पितमित्यन्वयः।एतत्किमितआह।मुक्ताहारवैदूर्यतोरणंत्यःराघ
यमानामणिमयाभरणप्रभुराहेमाःसुवर्णनिर्मितास्तलाजाकोटयश्चरणभूषणानि।कुंकुमासंभवउत्पन्नःरागःअंगरागःसुरभयःसुगं
धाःपौष्पाःपुष्पमय्यःविचित्राअनेकवर्णाःस्रजःवासःआच्छादनंविचित्रदुकूलंनानावर्णक्षौमं।एतदापसौंदर्यंकल्पितमितिभावः।
विशेषदर्शिनांतुनायमारोपइत्याह।बाह्येअंतःअभ्यंतरेनिरयंपश्यतांनारीतिनाम्नाज्ञातमित्यर्थः।तेषांनाममात्रेणैवअरलंभावो
भवतीतिभावः।अनालंबनमेवनिःकरणमेव।आविर्भवताप्रकटीभवता।कामाविष्टस्यव्याकुलत्वमेवदर्शयति।तथाहीति।अयंका

तथाहि।मुक्ताहारलतारणन्मणिमयाहेमास्तलाकोटयोरागःकुंकुमसंभवःसुरभयःपौष्पाविचित्राःस्रजः।वासश्चित्रदुकू
लमल्पमतिभिर्नार्यामहोकल्पितंबाह्यांतःपरिपश्यतांतुनिरयोनारीतिनाम्नाहतः॥ आकाशे।आःपापकामचंडालकिमेव
मनालंबनमेवाविर्भवताभवताव्याकुलीक्रियतेजनः।तथाप्ययमेवमभिमन्यते।बालामामियमिच्छतींदुवदनासानंदमु
द्वीक्षतेनीलेंदीवरलोचनापृथुकुचोत्पीडंपरारप्सते।आःअरेमूढ।कात्वामिच्छतिकाचपश्यतिपशोमांसास्थिभिर्निर्मितान
रीवेदनकिंविद्वत्रसपुनःपश्यत्यमूर्तःपुमान्।प्रतीहारी।इदोएदुमहाराओ।उपौपरिक्रामतः।प्रतीहारी।एसोम
हाराओउवदृष्टोतिठ्ठदिताउसप्पदुअज्जो।वस्तुविचारः।उपसृत्यजयतुजयतुदेवः।एषःवस्तुविचारःप्रणमति।राजा।इहोप
विश्यतां।वस्तुविचारः।उपविश्य।देवएषकिंकरःसंग्रामःआलयाअनुगृह्यतां।राजा।महामोहेनसहास्माकंसंवृत्तःसंग्रा
मतस्यप्रथमोवीरःकामःतस्यचप्रतिवीरत्वयाऽस्माभिर्भवान्निरूपितः।वस्तुविचारः।धन्योस्मियेनस्वामिनाऽहमेवसंभा
वितः।राजा।कथयकथयात्वंविद्ययाभवान्कामंजेष्यसि।वस्तुविचारः।आःपंचशरकुसुमधन्वाकामोजेतव्यइत्यत्रापिशस्त्र" मत्तापेक्षा

माविष्टःइयंबालामामावांछति।इयमिंदुवदनामांसानंदंयथाभवतितथाउद्वीक्षतेउर्ध्वग्रीवंपश्यतीत्यर्थः।इयमिंदीवरलोचनानीलो
त्पलनयनामांपृथुकुचाभ्यांस्थूलस्तनाभ्यामुत्पीडमुन्मर्दनंयस्यांक्रियायांयथाभवतितथापरिरप्सतेआलिंगितुमिच्छतीतिनिर्भत्सय
ति।आःअरेमूढपशोरितिकाइच्छतिकाचपश्यतिनकापीत्यर्थः।तत्रहेतुः।यतोमांसास्थिभिर्निर्मितानारीनकिंचिद्वेदवेत्तिजडत्वादिति
भावः।ननुतर्हिचेतन्योपलंभःकथमित्याशंक्याह।अत्रपुनःनारीएवेत्यर्थः।सत्रसिद्धाअमूर्तःअमूर्तिरहितःपुमानात्मापश्यतिद्रष्टाद्रष्टव्ययोरपि
भावोनघटतेइतिभावः।प्रतीहारीइसएउमहाराअःप्रतीहारीएषमहाराजःउपविष्टस्तिष्ठति।तावदुपसर्पतुभवान्संवृत्तःउ
दृष्टधर्मताभारात्मप्रयोजकेतिभावः।

पर्कांतःप्रपमेमुरव्यःपंचशरःकुसुमधन्वेत्यनेनतत्स्यशरत्वं अद्दढचापत्वंचसूचितं। ।तद्विजयोपायंदर्शयति। प्रपदढतरमिति। का
मं उन्मीलयिष्यामीतिप्रतिज्ञा। किंत्वबाह्यरंजीवस्यविषयानुसंधानमार्गमनइत्यर्थः। तदाराद्दूरे विषयानुसंधानात् पूर्वमे
वदढतरमपिधायसम्यक्निरुध्य। ननुसतिविषयस्मरणादौ कथंकामविजयइत्याशंक्याह। योषितांस्त्रीणांस्मरणमेवचि
त्तपरिहृतिःस्वभावेवेलक्षणंपतस्मिन्सतिदर्शनेनप्रत्यक्षेजातेवा। सतिपरिणतौपरिणामेविरसत्वंदेहस्यबीभत्सतांकदर्य
तांवाप्रतिमुहुःप्रतिक्षणंअनुचिंत्यअनुध्यायेत्यर्थः। एवंविषयानुसंधानात्प्रागनंतरमपिकामःसुजयइतिभावः। आंतरं
कामविजयोपायमभिधायबाह्यंतमुपदिशति। अपिच। विपुलेति। यदादमस्तितदानार्यःकृतदधीनामन्मथस्वकृउनयम
पश्य। ।दढतरमपिधायद्वारमार्गकथंविस्मरणविपरिहृतौदर्शनेयोषितांवा। परिणतिविरसत्वंदेहबीभत्सतांवाप्रतिमु
रे मूत्रपुरीषभाजने रमंति मूढा विरमंति पंडिताः ॥ इति ॥ तथा एवं द्वेऽपि अस्मिन् घोरे मायावहे पथि संसारे वर्तन्ते इति खेदं रताः ॥ आ
त्मनि न रताः आत्मनि विचारं न कुर्वंतीत्यर्थः ॥ तातः पिता ॥ पांथानामिति ॥ पिता च माता च बंधवः पितृव्यतत्पुत्रादयः तनयः पुत्रः

मनः ॥ वत्स पुत्र ॥ वैराग्यं ॥ उपसृत्य ॥ तात सोऽहं अभिवादये ॥ मनः ॥ वत्स जातमात्रेण त्वया त्यक्तोऽस्मि ॥ परिष्व
जस्व मां ॥ वैराग्यं ॥ तथा करोति ॥ मनः ॥ वत्स त्वद्दर्शनात् प्रशांतो मे शोकावेशः ॥ वैराग्यं ॥ तात कोऽयं शोकावकाशः ॥
यतः ॥ पांथानामिव वर्त्मनि क्षितिरुहां नद्यामिव भ्राम्यतां मेघानामिव पुष्करे जलनिधौ सांयात्रिकाणामिव ॥ संयो
गः पितृमातृबंधुतनयभ्रातृप्रियाणां सदा सिद्धो दूरवियोग एव विदुषां शोकोदयः कस्तदा ॥ मनः ॥ सानंदं वत्स एवमे
तत् ॥ यदाह वत्सः संप्रति हि ॥ नार्यस्तावनवद्यो वनामधुकरव्याहारिणस्ते द्रुमाः चोन्मीलन्नवमल्लिकासुरभयो मंदास्त
एवानिलाः ॥ अद्योदारविवेकनाशिततमनस्तोमस्वलीकं पुनस्तान्येतान्नगरस्त्रिकाणां वपयः प्रायान्मनः पश्यति ॥
सरस्वती ॥ वत्सायेवं ॥ तथा विगृहिणां मुहूर्तमपि आश्रमधर्मिणा न वर्तितव्यं ॥ तदद्य प्रवृत्तिनिवृत्तिरेव ते सह
धर्मचारिणी ॥ मनः ॥ सलज्जं ॥ यदादिशति देवी सरस्वती ॥ वत्स शमदमसंतोषादयः पुत्रास्त्वामुपचरंतु ॥ यमनिय
मादयश्चामात्याः ॥ विवेकोऽपि त्वदनुग्रहादेवोपनिषद्देव्या सह यौवराज्यमनुभवतु ॥ एतास्ततो मैत्र्यादयो भगि
न्यश्च भगवत्या विष्णुभक्त्या त्वत्प्रसादनाय प्रहिताः ॥ तास्त्वं प्रसादं अनुमानय ॥ मनः ॥ यदादिशति देवी ॥ बुद्धिनिवेशितास्^ वणिजामिव ते सह बंधुदा वोपनतानि
आतासहोदयाः प्रियापन्नाः ॥ एतेषां संयोगसंगमः ॥ पत्तनं दिक्वर्त्मनि मार्गे पांथानां पथिकानामिव सिद्धः क्षितिरुहां वृक्षाणां न
द्यामिव प्रवृष्टे आकाशे भ्राम्यतां मेघानामिव जलनिधौ समुद्रे सांयात्रिकाणां पोतवणिजामिव ॥ सिद्ध इति सर्वत्रानुषंजनीयं ॥ ३९
तदा दूरवियोग एव प्रकृतिः एवं सति विदुषां ज्ञानिनां शोकोदयः न कोपीत्यर्थः ॥ स्तोमस्वलीकं व्यतिक्रम्य ॥ नार्य इति मन स्तानेता
न्नगरस्त्रिकायां मरुमरीचिकायां ॥

आयुष्मता नवता ॥ आयुष्मान् जवान् ॥ स्वास्थ्यं विषयोपप्लवरहितं आपन्ने प्राप्ते सति ॥ हे वत्स अयं जीवः परां निर्वृतिं परब्रह्मानंदमा
पत्स्यते ॥ त्वत्संगादिति ॥ शाश्वतोऽपि जन्ममृत्युरहितोऽपि एको देवः परमात्मा त्वत्संगात् भूयिष्ठमिव वर्णमनासंपर्कस्तस्मिन् वोजन्मजयो
नाशः [illegible] पंचकलेन नव पल्लवः प्रवहितः सन् बुद्धिवृत्तिभिर्नानेव प्रतिभाति ॥ तिरोधः ॥ तत्र दृष्टांतः स नु द्रस्यवीचिषु जलराशे
श्चंद्रः प्रतिबिंबितः मूर्तिर्यस्य तथा घोरविस्तृतयेऽपि वा इदं तत्त्वं सर्वविस्तीर्णमिति नाना ॥ हे वत्स कथमपि पूर्वोक्तमार्गेण त्व
त्तो विषयासंगं विना आलंबनेन निवृत्ति चेतनं दाविततां विस्तृतां बुद्धिवृत्तीः संहृत्य संक्षिप्य सहजानंदेन सांद्रं नित्य स्व
स्वैकरूपमात्मा प्रकाशते ॥ प्रसन्नेति ॥ आदर्शे विरिवेति दृष्टांतः ॥ तत्र हि अविशुद्धे तोरे विर्जास्मतेन [illegible] दात्मा अविशेतो नासतइ
सरस्वती ॥ एते च नियमा सनादयश्च सादरमायुष्मता द्रष्टव्याः ॥ एतैरेव सह आयुष्मानिदानीं साम्राज्यमनुतिष्ठतु ॥
त्वयि च सास्थ्यमापन्ने हे वत्स अयं जीवः परां निर्वृतिमापत्स्यते ॥ यतः ॥ त्वत्संगाच्छाश्वतोऽपि जलचलयजलोपक्तो बुद्धिवृत्ति
भिः को नानेव देवो रविरिव जललवे वा चिद्व्यस्तमूर्तिः ॥ त्वयि आलंबे वत्स चेत्कथमपि विततास्तावससंहृत्य वृत्तीर्नीत्यादर्शे
प्रसन्नोर विरिव सहजानंदसांद्रस्तदात्मा ॥ तद्वत्स तातानामुदकदानाय नदीमवतरामः ॥ मनः ॥ यदाज्ञापयति भग
वतीति निष्क्रांताः ॥ ॥ इति श्रीमन्महाविरचिते प्रबोधचंद्रोदये पंचमोंकः ॥ ॥ अतः परं प्रबोधप्रादुर्भावो वर्ण्यते ॥
ततः प्रविशति शांतिः ॥ आदिष्टास्मि महाराजविवेकेन ॥ यथा वत्से विदितमेव भवत्या यथा किल ॥ अस्तंगते सुतनये सुवि
लीनमोहे वैराग्यभाजि मनसि प्रशमं प्रपन्ने ॥ क्लेशेषु पंचसु गतेषु शमं समाहितस्ता वबोधमभितः पुरुषस्तनोति ॥

अतिनावः अंकमुपसंहरति ॥ तद्भवतीति ॥ ज्ञातीनां कामादीनामुदकदानाय अंजलिदानाय ॥ अनेन दत्तजलांजलीनां तेषां
पुनर्भवः सर्वथा नाशकनीय इति भावः ॥ इति श्रीनाथाविश्वनाथदाक्षितसूनुगणेशविरचितायां प्रबोधचंद्रोदयटीकायां वि
वेद्रिकायां पंचमोंकः ॥ पंचमेंके वैराग्यसिद्धिमभिधाय षष्ठे जीवन्मुक्तिं क्रमेणाभिधास्यन् शांतिः प्रवेशं स्तौति ॥ ततः प्रविशति शांति
रिति ॥ अस्तंगते इति ॥ तनये पुत्रे कामादिषु नष्टेषु सत्सु विलीनस्तिरोहितो मोहो यस्य एतादृशे वैराग्यभाजि मनसि शममुपरामं
प्राप्ते सति ॥ पंचसु क्लेशेषु अविद्यादिषु शमं शांतिं गतेषु सत्सु पुरुषः आत्मा तत्त्वावबोधं अभितः तत्त्वावबोधमखिलं त्वसमासं
देष्टांतनोति विस्तारयति ॥ अविद्या अस्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः ॥

पंचक्लेशाः प्रोक्ताः ॥ ।अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः स्थानवलाघाकुःपाशानात्मनिबंधनइति। तत्र मिथ्याज्ञा
नं अविद्या बुध्यात्मनोरैक्यधीरस्मिता। विषयेच्छा रागः। दुःखतत्साधने अप्रीतिर्द्वेषः। अननुभूतान्मरणाद्भयमभिनिवेश इति
पंचानां स्वरूपनिरूपणं। त्वरिततरं सा घ्रतरं उपनीयसंमान्य। राजकुलेराजगृहे। प्रत्यूषेणैव। असत्तेनैव। अस्तामिति। पत्र
राजकुले असतां मोहादीनां निग्रहोदंडः। यत्र शमादयः। प्रभुः। पत्रच जगत्स्वामी देवः आज्ञावशीरतु जीविनिर्दिष्टैराराध्यते से
व्यते। आदेत्यादीनि। अयेअप्ररवलु राजकुलवासमित्यर्थः। प्रवृत्तिः प्रवर्त्तनं कस्यकृतकस्य निग्राह्येन वेदित्यर्थः। तथापुरु
षस्य जीवस्य मनसि निग्रहार्थं प्रवृत्तिरितिभावः। स्वाम्येवअत्रैव। अलंकरिष्यति। अंगीकरिष्यति। प्रतिसंधत्ते प्रपंचस्वीति प्र
बहुवत्तीत्वरितं देवीमुपनिषदं मनुनीयमसकाशमानयत्विति। विलोक्य। अयेएषा अंबाकिमपि सहर्षमंत्रयंतीइत
एवागच्छति। ।ततः प्रविशति श्रद्धा। अयेअपरखलु राजकुलमवलोकयितुं चिरेणमेपीयूषपरोवलोचनेभूतों। ।अस्तांनिग्र
होयत्रसंतःसत्याःशमादयः। आराध्यतेजगत्स्वामी वरंपदेवोनुजीविभिः॥ ।शांतिः। उपसृत्य किंमंत्रयमाणाअंब काश्चि
तासि। ।श्रद्धा। अयेअद्यत्यादिपठति। ।शांतिः। ।अंबमनसि कीदृशी स्वामिनः पुरुषस्य वृत्तिः। ।श्रद्धा। ।यादृशी वध्यैनिग्राह्यक
स्यभवति। ।शांतिः। ।कथंस्वाम्येवसाम्राज्यमलंकरिष्यति। ।श्रद्धा। ।एवमेतत्तथाप्यात्मानं प्रतिसंधत्ते ततो देवएव स्वाराज्येसंग्रा
हृन्नविष्यति। ।शांतिः। ।अथ देवस्य मायायां कीदृशोऽनुग्रहः। ।श्रद्धा। ।ननु निग्रह इति वक्तव्ये कथमनुग्रहः शक्यते वक्तुं। देवो
हि मायां सर्वानर्थबीजमिति यमायासर्वथा निग्राह्येति मन्यते। ।शांतिः। यद्येवं कानीदानीं राजकुले स्थितिः। ।श्रद्धा। ।श्रणु।
नित्यानित्यविचारणा प्रणयिनी वैराग्यमेकं सुहृत्सन्मित्राणि यमादयः शमदमप्रायाः सहायामताः। मैत्र्याद्याः परिचारिकाः सह
चरी निर्भेदमुद्राबला दुष्टोघारिपवर्ग मोहममतासंकल्पसंगादयः॥ ।शांतिः। ।अयमर्थस्य स्वामिनः कीदृश प्रणयः।
कस्येनावगच्छतीत्यर्थः। स्वाराज्यं संभाव्य एतत्पदद्वयविषयो देवएव न भविष्यति नान्य इत्यर्थः। अन्यस्य निग्राह्यत्वादिति भावः। माया
यां मूलाविद्यायां स्थितिर्व्यवस्थिता नित्यानित्येति प्रणयिनी कुटुंबिनी एकं वैराग्यं सुहृत् सन्मित्रं यमादयः सन्मित्राणि शमदमप्रायाः शम
दमाद्याः सहायामताः। आदिपदं मौनादिग्राह्यर्थं मैत्र्याद्याश्चतस्रः परिचारिका दास्य इत्यर्थः। नित्यं मुमुक्षा मोक्षेच्छा सहचरी सखी अ
बलाऽदुष्टो घातिपवर्गः मोहममतासंकल्पसंगादयः आदिपदं रागादिपरिग्रहार्थं प्रणयः प्रीतिः। ४७

वैराग्यसन्निकर्षात्प्रवृत्तिवैराग्यसन्निधानमाश्रित्येत्यर्थः। नितांतं अत्यर्थं इहामुत्र इहलोकपरलोकयोः अर्थफलभोगेभ्यः विषय
सुखेभ्यः विरसएव गगनचक्षाएव। नत्र हेतुं प्रदर्शयति। सनरकादिति। सपुरुषः पापस्य फलान्नरकादिव पुण्यफलात्स्वर्गादपि न
संजति। कथं भूतात्पुण्यफलात्। नाशिनः नश्वरादित्यर्थः। तथा च विनाशित्वदोषदर्शनात्ततो विरक्त इति भावः। इति हेतोः स
मुज्झितसमस्तकाम्यफलाभिसंधानसंबंधो यस्मिन्नादरात्कर्म नित्यमितियावत्। कथंचन कथंचित्प्रकारेणापि दृष्टो
चितत्वमात्रेणेतियावत्। मन्यते स्वीकुरुते। काम्यानां कर्मणां त्यागं संन्यासं कवयो विदुरिति वैराग्यानंतरभावासंन्यासो
नान्विहितइति द्रष्टव्यः। पुरुषंधर्मं नत्यजति किंतु धर्मएव पुरुषं त्यजति। तदुक्तं भगवता। नकर्मणा त्यजेद्योगीत्यज्यते कर्मभिः
श्रद्धा। ।वृत्तिर्वैराग्यसन्निकर्षात्प्रवृत्तिर्नितांतमिहामुत्रार्थस्य फलभोगे विरसएव स्वामी॥ तेन। ।सनरकादिव पापफ
लाद्भयं भवति पुण्यफलादपि नाशिनः॥ इतिसमुज्झितकामसमुच्चयं स्वकृतमर्थकथंचन मन्यते। ।किंत्वसौ क्षयकुश
वणतांस्वामिनो विचिंत्यकृतकर्त्तव्यमिवात्मानं मत्वास्वयमेव धर्मः सत्ययव्यापारोऽभूत्। ।शांतिः। ।अयमर्थात्तु परं
गान्निग्रहीतामहामोहः। विलीयस्थिताः। तेषां कोवृत्तांतः। ।श्रद्धा। ।श्रणु तथा दुरवस्थागतेनापि महामोहहतकेन स्वा
मिनः प्रबोधनाय मधुमत्या विद्यया सहोपसर्गाः प्रेषिताः। अयं वा भिप्रायः। यद्येते प्रलोभयामासकः स्वामी विवेकोप
निषदं चिंतामपिन करिष्यतीति। ।शांतिः। ।ततस्ततः। ।श्रद्धा। ।ततस्तैर्गत्वा स्वामिनि कापि रंगेन्द्रजालिकाविद्योपदर्शिता॥
स्वयमित्याह। किंत्विति। असौ घटादिरूपः प्रवृत्तिजन्यो धर्मः पत्यकुशवणतांआत्मैकनिष्ठतां हतं कर्तव्यं मनो वै मुख्यं।
रूपं कार्यं येन तादृशं आत्मानं अथ व्यापारः अनादृतप्रकारः। धर्मस्य हि श्रेतः करणशुद्धिफलं तस्य जातत्वेन निःप्रयोजकत्वया
धर्मः सत्ययव्यापारो भूदिति भावः। नन्वेतदनुपपन्नं कर्मणां स्वतंत्रतया स्वर्गादिफलसाधनानां कथं मनो वै मल्य हेतुत्वं। न हि घ प्रं
टहेतुर्दंडः घटादितरं जनयतीति चेत्। अवच्छेदकभेदेन भवत्वात् दंडस्यापि दंडत्वेन घटं प्रतिद्रव्यत्वेन संयोगादिकं प्रतिहेतु
त्वेन गंधादिकं प्रतितत्कारणत्वाभ्युपगमवत्। अत्रापि कामनातद्विरहयोरवच्छेदकत्वेन अन्यत्रापि अवच्छेदकभेदाद्धे
तान्युपगमो नवाधकमावहति। ननु नात्राचयव्यतिरेकाभ्यां कारणता ग्रहस्तयोरप्रवृत्तेः। अन्यस्य च अनुपलंभात् अवच्छेद

केनेदेपिकर्यकारणतानिर्वाहइतिचेत्।न।धर्मेणपापमनुदतियोगिनःकर्मऊर्वतिस्पृहांत्यक्त्वात्मनृद्धयेइतिस्मृत्योक्तत्वात्।
तथाचज्योतिष्टोमादिरवृष्टेदनेदेनजन्मपदेऽमर्हतीतिसिद्धं।ननुतथाप्यनुपपन्नमेतत्।व्रीहिसंस्कारकावहननादेतिन
मनःसंस्कारकस्यकर्मणोगुणकर्मतास्यात्।स्वातंत्र्येणस्वर्गादिफलसाधनतानुपपन्नमानाहिगुणकर्मणःफलानां
नरमस्तीतिचेत्।सत्यं।कारकसमवेतातिशयजनकत्वेपिनगुणकर्मत्वंतत्रनियोजककमाणाभावात्।तथाहि।आधा
नस्यअग्निसंस्कारत्वेपिनदर्शपूर्णमासादीन्प्रतिगुणकर्मता।किंभूतसंस्कृताग्नयपासतिसंभवदर्शादौउपकर्वति
नत्रदर्शतियैवतथाकर्मणासिद्धांतःकरणशुद्धिःसंभवतिकरणादौतानेउपकरोतितदभावेचस्वर्गादावितिनकोपिवि
रोधः।अन्येतुतमेवंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेतिविविदिषावाक्येनाग्निहोत्रादि
नित्यापकैविधीयेते।नचाधिकारांतरसंबद्धस्यकर्थज्ञानाधिकारसंबंधोविनियुक्तःविनियोगविरोधादितिवाच्यं।खादि
रोयूपोभवतीतिपशुप्रकरणपठितत्वाक्यात्क्रत्वर्थमपिखादिरत्वंखादिरंवीर्यकामस्येतिवाक्यांतरेणवीर्यशेषतया
विनियोगवदुपपत्तेरिति।नन्वेतद्वाक्यगुणमेकप्रकरणपठिततयावप्रकरणबलाद्धिनियुक्तस्यैवपरामर्शःसंभवति।अ
न्नुप्रयोजनांतरप्रयोजनान्यत्वमितिन्यायेनउद्गापाधिनामयनेमासमग्निहोत्रंजुहोतीत्यत्रअग्निहोत्रंजुहोतिपदाभ्यां
नप्रकृताग्निहोत्रंजुहोतीतिपरामर्शःकिंतुकर्मांतरमितियावता।यज्ञादिष्क्रतिरग्निहोत्रादिकर्मसमुदायेनपरामृष्टुमर्हती
तिचेन्न।दृष्टांतवैरूप्यधिकरणत्वात्।तथाहि।तत्रद्रिताध्यर्थबोधकोर्यजुहोतिसमानाधिकरणमग्निहोत्रपदसिद्धस्यनप
रामर्शकं।अत्रतुज्ञानेनविविदिशंतीत्यनेनासमानाधिकरणोसिद्धार्थबोधकंयज्ञेनेतिपदंकथंनपरामृशेत।अन्यथाए
षवावप्रथमोयज्ञोयज्ञानामित्यत्रापिएषयःपदाभ्यांप्रकृतज्योतिष्टोमपरामर्शोनस्यात्तत्रापिप्रकरणांतरसज्ञावादित्य
लमतिविस्तरेण।मत्तमोहस्यद्दृष्टांतरोधृगांतिप्रभमुखेनस्तवयतिशांतिः।अथेतिशब्दोधिकारणांतरइत्यर्थः।निलीयसंगो
प्य।मधुमतीसिद्धिविशेषाः।एतेष्वेवउपसर्गेष्वेवकापिकापिअनिर्वाच्याऐंद्रजालिकीअसदर्थप्रदर्शनरूपाविद्याशिल्पं। ४१

ना
द्या

शाह्यानिति।एषपुरुषःयोजनशतचतुःशतकोशपरिमितादध्वनःशाह्यानस्पृणोति।अस्यतेतेवाऽन्याचाग्निकाराःअग्रताःआवि
र्भवंतिस्फुरंति।भुवि।पदेव्याकरणादिदोषरहितैःपदैःजोकान्ऐंद्रादिलोकान्मेरुवींमेस्तनंदेविनीःस्फुरद्दरुचाःरत्नघटिताःस्थलीः
उपन्ननागाःमधुमत्याउपकल्पिताःभूमिःस्थलीविशेषःतोआपन्नोपासःउपक्षिपतेप्रलोभ्यते।अतउपाधिरमणीयःस्वच्छावि
दुरदःइत्यर्थः।विविधानानाप्रकारायेविलासाहावभावादयःलावण्यंसौंदर्यं।एतान्येवपुण्यंकारणोपचारात्तन्मयतत्त्वधानः।
एतानिविद्याधरांगनविशेषणानि।मंगलंदधिदूर्वादिदर्शनंआदिःप्रथमंयस्य।एतादृशोयोर्धःप्रजादिधिस्तेनव्यग्रपाणिःअ
सक्तहस्तःप्रणयेसंभाषणादौपेशलःअतिचतुरः।कनकेति।कनकस्यप्रभवत्तस्यसिकतावालुकातयुक्ताःस्थलीतीरभागो
तथाहि।।शतेनेयस्पृणोतिषोजनशतादाविर्भवंत्यमृतास्तेतेवेदपुराणभारतकथागाथादयोवाऽन्याःसृष्ट्यातिस्व
यमिच्छयाशुचिपदैःशास्त्रातिकाव्यानिवालोकान्भाम्यतिपरयतिस्फुटरुचोरत्नस्थलीमैंरवा।।।मधुमतीभूमिमाप
न्नःस्थानानिमानिनिर्दिष्टवत्तानिरूपछंद्यते।मोहहेतुष्यतांनात्रजन्मनमूत्स्फरन्तुपाधिरमणीयोयंदेशः।एषत्वामुपस्थि
तोविविधविलासलावण्यपुण्यमयोमंगलाचारयर्थव्यग्रपाणिःप्रणयपेशलोविद्याधरीजनः।इहहि।।कनकसिकता
स्थलीलवंतीःपृथुजघनाकमलाननावरोरूः।मरकततलकोमलावनालीर्मतनिजपुण्यहृतांभसर्वभोगान्।।शांतिः।।
ततस्ततः।श्रद्धा।।पुत्रितदाकर्णमाययाज्ञाप्ममेतदित्यक्तं।मनसाचानुमोदितं।संकल्पेनप्रोसाहितंस्वामीसंमतिपथमि
वापन्नः।।शांतिः।।सखेदं।हाधिक्।कष्टं।सखिपुनरपिमामेवसंसारवागुरामभिपातितःस्वामी।।श्रद्धा।।नखलु।।शां
तिः।।ततस्ततः।।श्रद्धा।।ततस्तयापार्श्वविलासेनातर्केणतावत्सर्वाभ्रातिक्रोधावेशकषायमानमालोक्याभिहितःस्वामी। ।
याभूताः।स्रवंतीःनदीः।ततजेष्विवपृथुजघनाःस्थूलनितंबाःकमलाननाःपद्मवदनाःवरोरूःजंघाः।मरकतस्यनीलपाषाणस्यदला
नितदूकोमलावनालीःवनपंक्तिःमननिजेनस्वेनपुण्येनहृतान्उपार्जितान्भोगान्विषयानंदंश्वभजस्वाभ्यमेततसम्यगेतत्।
अनुमोदितंएवमेवैतदिति।अंगीकृतंप्रोत्साहितं।साधुसाधुअवश्यंक्रियतामिति।उद्योगंसंमतिपथमिवगतवत्।कोपिविरोध
इत्यंगीकारमार्गमिव।वाम्रुराजालंनखलुनहिनहीत्यर्थः।तर्केणसदसद्विचारेणसर्वाभ्यायामनःसंकल्पान्।क्रोधावेशःक्रोधस्या
वेशःअभिनिवेशःकषायितेविवर्णेनेत्रेयस्यांक्रियायांयथेत्यर्थः।

विषया एवामिषं तन्न्यासेन प्रबोधजाः तैः आस्थानीधूर्तैः सज्जावतारणापरदीनबककुब्रैतैरित्यर्थः। तेष्वेव सर्वपरिचितेष्वेव तेषु
बहुर्वचकारेणैव विषमाङ्गः सहायो विषयरूपाङ्गारास्तेषु नाववुध्यसे। न जानासि त्वं बेति। भवसंसार एव सागरः समुद्रस्तस्य
तारणाय तु चिरा क्षिरकाजनयायोगरूपा तरिर्नौका सा समाश्रिता अधुनाइदानीं तां नौकां मदात् योगोपसर्गजनिताहंकारात्
परिमुत्सृज्य च कथं अंगारनदी विषयवृक्षिप्रवाहं कथं किमिति विगाहसे। आलोडयसि। तद्वचनं तु केवचनं आकर्ण्य श्रुत्वा आत्म व

स्वामिन् किमेवं निर्विषया मिषग्रासगृध्नुनिरास्थानीधूर्तैः पुनरपि तेष्वेव तथैव विषयांगारेषु निपात्यमानमात्मा
नं नाववुध्यसे। नन्वयो। भवसागरतारणाय यासु चिरा योगतरिस्त्वया श्रिता। अधुना परिमुच्य तां मदात्कथमंगारनदीं
विगाहसे। ।शांतिः। ।ततस्ततः। ।श्रद्धा। ।ततस्तद्वचनमाकर्ण्य स्वल्पि विषपेन्मः इत्यभिधायावधीरिता मधुमती।
शांतिः। ।साधुसाधु। अथ सखि प्रस्थिता भवती। ।श्रद्धा। ।आदिष्टाहं स्वामिना यथा विवेकं द्रष्टुमिच्छामि तत्त्वरतां भवती
ति। तदहं महाराजसंनिधिं प्रस्थिता। ।शांतिः। ।अहमपि महाराजेनोपनिषदमानेतुमादिष्टा तद्भवतु स्वनियोगं संपा
दयावः। इति निष्क्रांते। ।प्रवेशकः। ।ततः प्रविशति पुरुषः। ।पुरुषः। विचिंत्य सहर्षं अहो माहात्म्यं देव्या विष्णुभक्तेः। यतो यस्य प्र
सादान्मया। ।तीर्णाः क्लेशमहोर्मयः परिहृताः ग्रामा ममत्वग्रहाः शांताः पुत्रकलत्रबंधमकराः व्यात्यग्रहास्तयः क्रोधो
र्वाग्निरपाकृतो विघटिताः तस्मात् तृष्णा ग्रंथयः पारं तीरमबाधकस्य मधुना संसार वारांनिधेः। ।ततः प्रविशत्युपनि
षच्छांतिश्च। ।उपनिषत्। ।सखि कथं तथा निरनुक्रोशस्य स्वामिनो मुखमालोकयिष्यामि। येनाहमितरजनयोषिवत्सु
चिरमेकाकिनी परित्यक्ता॥ ॥धीरिता तिरस्कृता स्वामिना पुरुषेण नियोगं आज्ञा तां एषा इति। संसाररूपो वारांनिधिः
समुद्रस्तस्य पारे मया अधुना अबाधकस्य घातप्रायं। नन्नु महोर्म्यादिनेकानर्थबहुलस्य कथं पारे तीरे यातीत्याशंक्य तान्नि
राकृताइत्याह। क्लेशा अविद्यादयः पंच एव ऊर्मयो महातरंगास्तीर्णाः ग्रामा ममत्वरूपाः ग्रामा आवर्ताः परिहृताः पुत्रा एव मक
रास्ताः आहाः क्रूरा जलजंतवस्तेषां ग्रहः सर्वांग्रहणं सर्वा यैः तेषां ग्रसनानि। शोताः शमिताः क्रोध एव और्वाग्निः वडवानलः अ ४२
पाकृतः दूरीकृतः तृष्णा लतां ग्रंथयः बंधनानि विघटिताः मयेति सर्वत्र योजनीयं। विष्णुभक्तिमतः सर्वानर्थनिवर्हणपूर्वकं परपदप्राप्तिः सुलभे
त्यतिसामर्थ्यं विष्णुभक्तेरिति भावः॥ ।
निरनुक्रोशस्य निर्दयस्य

बाहोरिति। अहं कैः कैर्दुरितैः पापिष्टैः दुर्विदग्धैः दुष्टबुद्धिभिः हंत इति खेदे विधिवलात् आपतिता दासीकर्तुं न स्पृहिता न तर्किता अपितु स
वितर्किते वेत्यर्थः। अस्मिन्सति विवेके दूरसंस्थिते सति दूरगते सतीत्यर्थः॥ अयमेव विवेकोपरोधो यन्मांस्मत्काद्दूरगमनमिति भावः।
दासीकरणमुद्भूतां गतिमाह। बाहोर्हस्तयोः कंकणानां श्रेणयः पंक्तयः कथंभूताः श्रेणयः दलिताश्चूर्णिता मणयो यासां ताः॥
चूडारत्नस्य ग्रहणं तत्र यानि हस्तयोः विकाराः कर्षणरूपास्ताः। निःकेशपाशोऽद्भवितो नाशितः कैः कैर्नैत्यन्वयस्तत्र योजनीयं। तथा च
विना विवेकं नैयायिकादिभिरुपनिषदुपज्ञा व्यत इति भावः। दुर्विलसितं दुःस्थितं कामादिद्वारेण मनः प्रबोधयतेत्यन्वयः। नैस
शांतिः। ।देवि कथं तपा विधवि पस्यति तो देवः उपालभ्यते। ।उपनिषत्। ।न दृष्टा सखि त्वयैतादृशी मद्दशा। येनैवं अवादि।
शृणु। ।बाहोर्जन्माद्दलितमणयः श्रेणयः कंकणानां चूडारत्नग्रहनिहति निर्दृष्ट केशपाशः। कैः कैर्नाहं हतविधिव
शान्नादीहिता दुर्विदग्धैर्दासीकर्तुं सम्पदि दुरितैरीदृशं संस्थे विवेके। ।शांतिः। ।सर्वमेतन्महामोहस्य दुर्विलसितं। न तत्रास्ति दे
वस्यापराधः। तेन महामोहेन हि तथा तथा मनः कामादिद्वारेण प्रबोधयता त्वत्तोऽद्दूरीकृतो विवेकः। अहो एतद्देवकुल
स्त्रीणां नैसर्गिकं शीलं। यद्विपत्यति तस्य स्वामिनः समयप्रतीक्षणमिति। तदेहि दर्शनेन तिरोधाना पेन च संभावय दे
वं। संप्रत्यपहृताविद्विषः संपूर्णास्ति मनोरथाः। ।उपनिषत्। ।सखि संप्रत्यागच्छंतीवस्यायोगात् तथाहं रहस्यकृता। यथा
भर्ता स्वामी च पुरुषस्त्वया विद्याप्रश्नोत्तरेण संभावयितव्यः तेन प्रबोधोत्पत्तिर्भविष्यति। साहं कथं गुरूणां समक्षं धा
र्ष्ट्यं करिष्यामि। ।शांतिः। ।देवि अविचारणीयमेतद्वाक्यं भगवत्या गीतायाः। अयमेवार्थो विष्णुभक्त्या विवेकस्यानि
नोक्तः। तदेहि संभावय दर्शनेन भर्तारमादिपुरुषं च। ।उपनिषत्। ।यथा वदति प्रियसखीति परिक्रामति। ।ततः
प्रविशति राजा यथावत्। ।राजा। वत्से श्रद्धे द्रक्ष्यति शांतिप्रियामुपनिषदं। ।श्रद्धा। ।देवगृहात् देशैव राज्ञा निर्गता अतः कथं नता द्रक्ष्यति। ।
र्गिकं स्वाभाविकं। समयप्रतीक्षणमुदयकालावेक्षणमित्यर्थः॥ अकुजज्ञास्ते भर्तुर्विपन्मात्रेणान्यं पतिमाश्रयंत इति भावः। सं
भावय सन्मानय। अहल्यानामिताः उपनिषन्मन्नताज्ञीता यावसके इति विशेषणं समर्तं अग्रतः। गृहीतादेशैव स्वाज्ञताहेव। ।

कथमिव केन प्रकारेण उक्तेत्यर्थः॥ तर्कविद्यान्वयात् हेतुवादशास्त्रान्वयात् अत्र प्रविष्टा अंतर्लीना॥ प्रसोष्यति कथमपि प्रसोष्यति नदति चाव॥
ततः आगच्छ पुरुषं संनिधिमिति शेषः॥ विविक्तो विजने पक्षम विरुद्धः औचित्यविरोधित्वात् तस्यात वास्मास्तु नमस्कारो नुचिनयतं च
पुरा हि इति॥ पुरा हि पूर्वकाले हि धर्माद्धि निधर्ममार्गे निष्टसंज्ञा ऋषयः प्रबोधाः देवाः भूदेवाः ऋषय इत्यर्थः॥ स्वं संदिग्धं अर्थं तन
राजा। ।कथमिव। ।श्रद्धा। ।देव प्रागेव कथितमेतद् देव्या विष्णुभक्त्या सीत् यथा मंदराभिधाने शैले विलोकायतनेदेव्या
गीतायां तर्कविद्यान्वयादनुप्रविष्टेति। ।राजा। ।कथं तर्कविद्यायामन्वयं। ।श्रद्धा। ।देव एतमर्थं सैव प्रसोष्यति। तदागच्छ
उदेवः एषः स्वामी तवागमनमेवानुध्यायन् विविक्ते वर्त्तते। ।राजा। ।उपसृत्य स्वामिन् अभिवादये। ।पुरुषः। ।वत्स भद्र
मविरुद्धोयं सदाचारः यतो ज्ञानवृद्धतया भवानेवास्माकं उपदेशदानेन पितृतामापन्नः। यतः ।पुरा हि धर्माद्धि निनष्टसं
ज्ञा देवास्तदर्थं तनयान् पृच्छन्। ज्ञानेन सम्यक् परिगृह्य चैतान् हे पुत्रकाः संशृणुतेत्यवोचन्। ।तद्भवानिष्टत्वेनास्माकं
देवास्तदर्थं तनयान् पृच्छन्। तानेन सम्यक् परिगृह्य चैतान् हे पुत्रकाः संशृणुतेत्यवोचत्। ।उपनिषत्। ।उपसर्पति।
वर्त्तत इति एष एव धर्मः। ।शांतिः। ।एष देवि देवेन सह स्वामी विविक्ते वर्त्तते तदुपसर्पतु देवी। ।उपनिषत्। ।उपसर्पति।
शांतिः। ।स्वामिन् एषा उपनिषद्देवी पादवंदनायागता। ।पुरुषः। ।न खलु एवं वक्तव्यं। शांते यतो माता वास्माकं तत्र व
बोधोदयेन तदेषैव अस्माकं नमस्या। ।अथवा। ।अनुग्रह विशेषो देव्या मातुश्च महदंतरं। माता गाढं निबध्नाति देवी बं
धं निकृन्तति। ।उपनिषत्। ।उपसृत्य विलोक्य नमस्कृत्य। दूरे दूरे उपविशति। ।पुरुषः। ।अंब कथ्यतां क्व त्वया नीता
एते दिवसाः। ।उपनिषत्। ।स्वामिन्। ।नीतान्यमूनि मठचत्वरशून्यदेवागारेषु मूर्खमुखरैः सह वासराणि।
यान् पृच्छन्। ते च तनयाः एतान् व्रतमकुर्वन् ज्ञानेन हेतुना इति अवोचन् अवदन् इतीति किं हे पुत्रकाः संशृणुत सम्यगभिगच्छते
त्यर्थः॥ इदं च मनुनोक्तं। अध्यापयामास पितृन् शिशुरांगिरसः कविः। पुत्रका इति होवाच ज्ञानेन परिगृह्य तानिति एतेनान्यसंबं
धात् ज्ञानसंबंधो गरीयानिति दर्शितं। तथा च पुत्रैः पितृज्ञान वृद्धैर्पितरः पुत्रपदेनाभिमंत्रिता इति। न चानपिस्वस्मात् पितृत्वेनैव ५२
वर्त्तनामिति भावः। निबध्नाति संसारे आसंजयतीत्यर्थः। देवि उपनिषद् बंधं संसाररूपं निकृन्तति छिनत्तीत्यर्थः॥ क्व कुत्रेत्यर्थः॥ नीतान्य
मूनीति। मठाः यति गृहाः चत्वराः वेदिकाः शून्यदेवागाराणि। तेषु मूर्खाः ते मुखरा वाचालाः तैः सह अमूनि एतानि वासराणि दिनानि नीतानि नि
र्गमितानीत्यर्थः॥

स्वे

श्रिः

प्रज्ञातपत्रस्यो भरो दीनो वक्ष्येति। ते मूर्खमुखराः स्वेच्छया गुरूपदेशं विनैव मम गिरां वाचां मर्थम् अविचार्य विकल्पयंति अन्यथा क
ल्पयंति। तत्र दृष्टांतः। द्रविडांगना इव कर्णाटा हिंडीत्याः तेषां मम गिरां वाचां स्त्री निरुक्ता यथा वाचस्तासामिव। चायेण कुप्पा हिंसकूत वाचो
न वक्ति। स्वं गतो पन्यासः॥ यथा हि ईश्वरस्य रचितनामाः केपि वाच्या नाडि विड वक्ष्या रितवा चां स्वेच्छया अर्थमन्यथा कुर्वतीत्य तानि
रिदमुच्यते इति तथेत्यर्थः॥ परेषां लोकानामर्थोद्धवं। तस्य हरणं वंचनेन ग्रहणं तदेव प्रयोजनं यस्य तत्तथा मद्विचारणं।
पुरुषः। ।अथ ते ज्ञानं तिन्नवस्तास्तत्वं किमपि। ।उपनिषत्। ।न खलु न खलु किं तु ते स्वेच्छया मम गिरां द्रविडांगनोक्त
वाचामिवार्थमविचार्य विकल्पयंति। ।तेन तेषां परार्थहरणप्रयोजनमेव मद्विचारणं। ।पुरुषः। ।ततस्ततः। ।उपनिष
त्। ।कदाचित्। ।इष्टा जिनाग्निसमिदाज्यजुहूस्त्रुकवादिपात्रैस्तथेष्टिपशुसोममुखैर्मखैश्च। इष्टामयापरिवृता किल कर्म
कांड व्याप्तिपद्धतिर्याज्ञिनियज्ञविद्या। ।पुरुषः। ।ततस्ततः। ।उपनिषत्। ।ततो मया चिंतितं। अपि नामैषा पुस्तक न
खा हि नामैतास्य तितत्वं कथंचित्। एतस्याः संनिधौ कतिचिद्वासराणि नयामि। ।पुरुषः। ।ततस्ततः। ।उपनिषत्। ।त
तस्तामहमुपस्थिता तया चोक्ता स्मि यजुर्विद्यया भद्रे किं ते समीहितं। ।पुरुषः। ।ततस्ततः। ।उपनिषत्। ।ततो मयोक्तं।
आर्ये अनाथास्मि त्वयि निवस्तुमिच्छामि। ।पुरुषः। ।ततस्ततः। ।उपनिषत्। ।ततस्तयोक्तं भद्रे किं ते कर्मेति। ।पुरुषः। ।
ततस्ततः। ।उपनिषत्। ।ततो मयोक्तं। ।यस्माद्विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते भासा यस्य जगद्विभाति सह
ज्ञानंदोज्वलं यन्महः। शांतं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरं द्वैतध्वांतमपास्य यांति कृतिनः प्रस्तौमि तं पौरुषं। ।
यस्माद्विश्वमिति। तं पुरुषमात्मानं स्तौमि प्रतिपादयामि। कथंयस्मादात्मनो विश्वं जगदुदेति आयते यत्र आत्मनि विश्वं रमते) तस्मादि
ति। अथानंतरं मया अध्वनिमार्गे यज्ञविद्या दृष्टा। कीदृशी यज्ञविद्या। इष्टा जिनं इष्टा मृगचर्म अग्नयः गार्हपत्य दक्षिणाग्निरा
जिनेति। ...हवनीयाः समिधः आज्यं। जुहूः स्त्रुक् च प्रसिद्धानि। आदिपदात् उपचरुपुरोडाशादि परिग्रहः। तैस्तथा इष्टिः दर्शपूर्णमासेष्टिः पशुर्निरूढप
शुः सोमः ज्योतिष्टोमः। एतन्मुखैः एतदादिभिः आदिपदात् तीर्थमादिग्रहणं एवं मखैर्मखैर्यज्ञैश्च परिवृता सर्वतो युक्तेत्यर्थः॥ पुनः कीदृ
तिराचो शी। कर्मकांडं ज्योतिष्टोमादि कर्मणि फलाय व्याप्तिसंदिष्टापद्धतिर्यज्ञानकर्मो पयासा। तम्मी हितं वांछितं। त्वयि त्वसमीपे। यस्माद्विश्वमिति।

तं पुरुषमात्मानं प्रस्तौमि घतिपादयामि। कथं यस्मादात्मनो विश्वं जगदुदेति नाप्येतयत्रात्मनि विश्वं रमते क्रीडति यस्मिन्पुनरंते विश्वं जी
यते यस्य भासा प्रकाशेनैतज्जगद्विभाति प्रकाशते यन्महस्तेजः सहजानंदोज्ज्वलं नित्यानंदेन स्वप्रकाशमित्यर्थः॥ कति नधीरा अपुनर्भवा
यमोक्षाय द्वैतध्वांतं नेदृक्तमोंधकारं अपास्य निरस्य तत्परमात्मानं यांति प्राप्नुवंति। कथंभूतं शांतं। दोषरहितं। शाश्वतं नित्यं।
अक्रियमव्यापारं अकर्तारमिति यावत्। यत्तु विद्यात्विद्यांतमुपन्यस्यति। पुमानिति। अकर्ता कर्तृत्वरहितः पुमानात्मा कथमनी
श्वरोऽनवेतनकथं विश्वस्य सिस्टष्टेौपाधिकत्वादिति भावः। ईश्वरातिरिक्तस्याकारेद्वैतापत्याकर्तृत्वाद्युपाधिविशिष्ट एवेश्वरस्तस्य
च प्रतिपादनं पुरुषार्थायेत्याह। क्रियाकर्म तत्र कोदिकां संसारछेदहेतुर्न वक्ष्यधीरात्मज्ञानमात्रं नेत्यर्थः॥ ज्ञानकर्मणोः समुच्च
यस्याकारात्कर्मैवावश्यं कर्तव्यमित्याह। संसारनाशिन्यः क्रियाकर्माण्येव कुर्वन्सन्शांतमनाः नियतचित्तः शतं समा वर्षाणि

यत्तु विद्यया विचिंत्योक्तं। ।पुमानकर्ताकथमनीश्वरोऽनवेक्रियाजवछेदकारानवक्ष्यधीः। कुर्वन्क्रियाएवनरोऽनवच्छिदः शतंस
माशांतमना जिजीविषेत्। ।तन्मे नानिप्रयोजनोऽनवत्याः परिग्रहः। तथापि यदि कर्तारं भोक्तारं पुरुषं वक्ष्यवंति क्रियत्कालं
मिदृक्तमिच्छतितत नो को दोषः। ।राजा। ।सोपहासं अहो ध्वमोंधकास्याममलितदशोयत्तविपायादुःप्रहत्वंयथैवं कुतर्कै
पहताः यतः। ।अपरस्वभावादचलं बलाञ्चलत्यचेतनं चुंबकसंनिधाविव। तनोतिविश्वेक्षितुराक्षितेरिता जगंतिमायेश्वरते
यमाशिऊ। ।तस्मात्तमोंधानामेवेयमनीश्वरदृष्टिः।

जिजीविषेत्प्राणधारणं कुर्यादिति यावत्। परिग्रहः स्वीकारः। ध्वमोंधकारेणग्यामलितामलिना ज्ञता दृक् दृष्टिर्यस्याः दुःप्रतत
कुतर्केण सत्तर्केणोपहता मोहिता नर्कस्यासत्त्वं दर्शयति। अपर इति। मायाम्हत्ता विद्या जगंति तनोति उत्पादयति। ननु माया
प्रेरकत्वादपि यस्य क्रियात्वमित्याशंक्याह। कीदृशी माया विश्वेक्षितुः जगत्साक्षिणः ईक्षितेन ईक्षणमात्रेण ईरिता प्रेरिता तथा चेश्वरमे
वजगतो हेतुः प्रेरितमाया विश्वसृति मात्रमेव ईशितुः ईश्वरस्य ईश्वरान्नपुनः सिस्टक्षादिरूपधिवैशिष्ट्यमपीति भावः। ननु चेतनायाः
कथं दृष्टा प्रेरणोत्पत्तिकारद्दष्टांतेनोपपादयति। अचेतनमचलं चलतीदं हंत्र चुंबकसंनिधाविव अयःकांतसंनिधाने यथा चलति तथैव
घांतं वदेतुमाह। स्वभावात्तथा चाविद्याप्येवं स्वभावादेव भगवद्ध्यानमात्रेण विश्वस्य प्रवर्तनं इति भगवानीश्वरः कर्तृव्यापारसहित स्तत्कत
मप्युपपन्नमिति भावः॥ ४४

८

इदानीं यत्तु विद्योक्तं कर्मणां मुक्तिहेतुत्वं निराकरोति। अबोधेत्यादिना। अबोधध्वजं वं कोधतमसं गाढांधकारं अपनिनीषति अपनेतु
मिच्छति कारणाभावे कार्याभिच्छति अतिप्रांतेति भावः। अज्ञानतत्कार्यं अधिष्ठानज्ञानान्निवर्तते। लोके दृष्टांतान विज्ञान निते भुक्ति
रजतं अधिष्ठानशुक्तिसाक्षात्कारान्निवर्तते तेन तु सजातीयेनाज्ञानकार्येण। श्रुतिरपि। तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यते
ऽयनायेति। तथा चाज्ञानैकनिरूप्यासवतानंतत्कार्यं प्रपंचश्चेत्यभिप्रेत्याह। स्वभावेति। स्वभावेन लीलानिअप्रकाशमया नितमोमया
निप्रकाशानिअविद्यामयानितदुपादानकत्वात्। स स तु वनानि च्छाधानिप्रकाशयेत। अन्यस्य प्रकाशस्याभावादिति भाव॥
तमेव तत्साक्षिणमेव विद्वान्सत्यत्वेन ज्ञानन्पुरुषः अतिमृत्युमोहं एति। अतोऽज्ञाननिरिक्तउपायोमुक्तिहेतुर्नास्ति। विमृश्य

अबोधध्वजं वंचनसारं कर्मभिः शमयंतीयत्त विद्यान्तनमंधतमसं कोधकारेणापनिनीषति। ।स्वभावलीनानितमोमया
निप्रकाशयेद्योत्तुवनानि सत्त। तमेव विद्वान तिमृत्युमेति नान्योऽस्ति पंथा मुक्तिहेतुः। ।पुरुषः। ।ततस्ततः। उपनि
षत्। ।यत्तु विद्यया पुनर्विमृश्योक्तं। न खिल्वसंनिकर्षाद्दुर्वासनोपहतैरस्मभिरिदं तेवासिभिः कर्मसु सच्यव्यापारैर्नवि
तव्यं। तन्मया सी दत्तुं भवती स्वाभिजपितदेशागमनायेति। ।पुरुषः। ।ततस्ततः। उपनिषत्। ।ततोऽहं तामतिक्रम्य प्रस्थिता।
पुरुषः। ।ततस्ततः। ।उपनिषत्। ।ततउपसृत्य ततः कर्मकांडसहचरी मीमांसा मया दृष्टा। ।विजन्यकर्माण्यधिकारन्
निष्कृत्यादिनिम्नानुगताप्रमाणैः अंगैर्विचित्रैरभियोजयंती प्रासोपदेशैरतिदेशगैश्च। ।पुरुषः। ।ततस्ततः। ।उपनिषत्।
ततोऽहं तामपि तथैवाप्ययं पप्रच्छ अर्थितवती॥ अथ तयाप्युक्तासि भद्रे किं कर्मासीति। ततो मयात देवोक्तं। यस्माद्विश्वमुदेति।
विचार्य दुर्वासनोपहतैरस्मसंस्कारग्रस्तैरंतेवासिभिः शिष्यैः। कर्मकांडसहचरी मीमांसा पूर्वमीमांसेत्यर्थः। तस्याः स्वरूपमाह। विजन्ये
ति। मया मीमांसा दृष्टेति पदान्वागेवान्वयः। कथंभूता मीमांसा कर्माणि ज्योतिष्टोमादीनि विनियोगेन श्रुतिपाद्यंगैः अवहननोद
णप्रयाजानुयाजरूपैः अभियोजयंती उपकुर्वाणा कर्मणाम विनियोगेऽभिधानवगमने। नं तत्त्वा कोपि न प्रवर्तेतिल प्रयोजनाकर्म
विनागतस्तत्रचकर्माणि उपकुर्वन्तुंगोपकारश्चेति भावः। अधिकारभेदः कर्मभेदकरीत्याह। कादृशानि कर्माणि। अधिकारश्चियाज
न्यफलभागित्वेन निष्कर्माणिपिवित्रैः तं भजतेतानि तथा पुनः कथंभूता मीमांसा। श्रुत्यादिभिः श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यादिभिः। तासा
५५ घक्रियापायामित्यपेक्षास्थाने। क्रमोऽयोगबलेसमाख्याइति। कीदृशैरंगैर्विचित्रैरनेकभेदभिन्नैः आडपकारकाश्च यत्रपेरित्यर्थः। पुनः क

र्थं कृते। शास्त्रोपदेशौ सा साक्षादुपदिष्टे पुनः कीदृशौ अतिदेशगौ। अतिदेशप्रमाणप्राप्तौ। अन्यत्र कृतस्यान्यत्रान्वयः अतिदेशः। यथाधि
त्य प्रापणीयं चरुं निर्वपतीत्यत्र च बैंगानि अभ्यर्थितवती प्रार्थितवती। क। पार्श्ववर्त्तिनं निकटवर्त्तिनं लोकांतफलं स्वर्गसुखादि तद्
प लोगयोगस्यरूपनयन प्रतिपादनेन तद्योग प्रयोजनेन तत्प्रयोजनेन प्रियतां कामयमानानां। एतदस्माकमित्यस्य विशेषणं। प्र
नरूपं किं अनुमोदितमेव। साक्षात् साधि वृत्तं अंगीकृतमेवेत्यर्थः। अतिशयेन प्रवृद्धा प्रतिष्ठा यस्य तादृशेन मीमांसायाः पदं पर
स्यं तत्र अधिदैवतेन अधिष्ठातृदेवतारूपेणेत्यर्थः। कौमारिलस्वामिनाम्नेहेनेउपनयेनेति। अपरेण मुरारिणा एकदेशिना लौ
पु। त। उ। ततो मीमांसया पार्श्ववर्त्तिनं पुरुषमवलोक्याभिहितं। अस्त्येवास्माकमस्या लोकांतरफलभोगयोग्य पुरुषो
पनयनेनोपयोगः। न हि विधीयतां कर्म्मोपयुक्ता। न चैतः सर्वैरंतेवासिभिरेतदनुमोदितमेव। अपरेण त्वतिप्रवृद्धप्रतिष्ठेन
मीमांसापदयाधिदैवतेनैव कुमारिलस्वामिनाभोक्तं। देहिनेयं कर्म्मोपयुक्तं पुरुषं समुपनयति। किं त्वकर्त्तारमनो
क्तारं ईश्वरमिति। नवासोईश्वरः कर्मसुयुज्यते। अथ अपरेणोक्तं। अपि किं लौकिकोऽपगतपुरुषादोषरोनाभ्यो
ततस्तेन विहस्योक्तं। अस्ति। तथा हि। ।एकः पश्यति चेष्टितानि जगतामन्यस्तमोहांधधीरेकः कर्म्मफलानि वांछति दात्य
न्यस्तान्यर्थिने। एकः कर्म्मसु शिष्यते तनुभृतां शास्त्रेव देवोपरो निःसंगः पुरुषः क्रियासु न कथं केवैर्निसंभाव्यते। ।रा
ग। ।सहर्षं। साक्षात् साधु कुमारिलस्वामिन् साधु भवतो सिद्धा युष्मान्नव।
न किं कात् लोकप्रसिद्धपुरुषात् तेन भेदेन। एकः इति। एकः ईश्वरः जगतां चेष्टितानि कर्म्माणि पश्यति जगत्साक्षीति भावः। अ
ईपुनः अन्यजीव मोहांधधीर्ज्ञानाविष्कृतत्त्वप्रकार इत्यर्थः। एकः जीवः कर्म्मफलानि पशुपुत्रादीनि वांछति। तु पुनः अन्यः ईश्वरः ई
तानि कर्म्मफलानि अर्थिने कर्म्मकर्त्रे ददाति। एकः जीवः कर्म्मसु शिष्यते। ज्योतिष्टोमादिषु नियुज्यते। तत्कर्तृत्वेन प्रतिपाद्यत इति। ध
वत। अपरो देव ईश्वरः तनुभृतां जीवानां शास्त्रेव प्रहरणहाराकारयितेव न कर्त्तेत्येव कारार्थः। एवं जीवानां इति विलक्षणः सन्नई भ
श्वरः कथं जीवधर्म्मा कर्त्तेति संभावनीय इति। सिंगः शरीरेंद्रियाभावात्। तत्संबंधरहितः पुरुषः परमात्मा क्रियासु कर्म्मसु कर्त्ता इति कथं ४५
संभाव्यते। न कथं चिदित्यर्थः। राजा विवेकः। ।

अथार्थे उपनिषदमवतारयति। तौ प्रसिद्धौ सुपर्णा गतिर्ययोस्तौ सुपर्णौ अव्याहतगती व्यापकाविति यावत्। पर्णं तागतिः
सहैव पतत इति सुवेत्यभिधानात्। सयुजौ सहयोगवंतौ सखायौ मिथोऽनुकूलौ जीवेश्वरौ समानं एकं वृक्षं शरीरं परिष्वजाते।
अधितिष्ठतः। अनयोर्द्वयोर्मध्ये एकस्तयोर्मध्ये जीवः पक्वं प्राप्तपरिपाकं फलमिव कर्म्मं अतिभुंक्ते। अन्य ईश्वरः अनश्नन् अभुं
न्न अभिचाकशीति। साक्षित्वेन पश्यतीत्यर्थः। का विदिति। काचित् पातंजलीया तर्कविद्या विद्यास्माकं तयोर्विशेषः। अर्थाद्भगवतः
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। एकस्तयोः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति। ।पुरु
षः। न तस्तत। ।उपनिषत्। ।ततोऽहं मीमांसामस्मिन्नपस्थिता। ।पुरुषः। ।ततस्ततः। उपनिषत्। ।ततो मया बहुभिः शि
ष्यैरुपास्यमाना तर्कविद्या विलोकिता। ।काचिद्धि भवविशेषकल्पनपरान्यायैः परातन्वतीवादं सकलजातिनिग्रहमयैर्जल्प
वितंडमपि। अन्या तु प्रकृतेर्विविच्य पुरुषस्योदाहरंती जिदां तत्त्वानां गणना परा महदहंकारादि सर्गक्रमैः। ।पुरुषः। ।
ततस्ततः। उपनिषत्। ।तथैवाहं ताः समुपस्थिता ताभिश्चानुप्रक्रम्यादेवकर्म्मोदाहृतं यस्माद्विश्वमुदेतीति। ततस्ताभिः ॥ कारोपहा समर्थ॥।
साधसंस्थत्वं रूपः तत्कल्पनपराः स्वप्रतिपादनपरेत्यर्थः। तद् कंठकमंजलौ। केषा कर्म्म विपाकाशयैरपरामृष्टो निर्माणकायम
धिष्ठाय सदायः प्रवर्त्तको व्याहतश्चेति पातंजला इति पराग्गेतमीया तर्कविद्यान्यायैरनुमानैर्वादं जल्पं वितंडमपि तन्वती विस्तार
यंती। नैय्यायिकमते हि नानावक्तृकपूर्वपक्षसिद्धान्तवाच्यवाक्यसंदर्भः कथा तद्भेदाः स्वपक्षस्थापनपरः कथा वादः स्वपक्षस्थापनप
रपक्षदूषणवती विजिगीषुकथा जल्पः स्वपक्षस्थापनहीना विजिगीषुकथा वितंडेति। कथं च तैर्न्यायैः छलजात्यंतरेण प्रत्यु
क्तस्य परास्यांतरकल्पनं तेन सहिता जातिरसदुत्तररूपा। स्वव्याघातकवचनरूपेति यावत्। निग्रहस्य पराजयहेतुस्थलम
ये तत्प्रधानैरित्यर्थः। अन्यासां स्त्रीयानर्कविद्या प्रकृतिश्चैनाद्विजगत्कारणं वृत्तं विविच्य पृथक्कृत्य पुरुषस्यात्मनो भेदान्वेदयदा
हरंती कथयंती मया अवलोकितेति सिद्धपि संबध्यते। कीदृशी सांख्यीयानर्कविद्या महदहंकारादिसर्गविवेचनादानेऽप्रसर्गः स्मृष्टिस्त
त्क्रमैः तत्त्वानां पंचविंशतीनां गणनापरा प्रकृतिर्महान्महतोऽहंकारः अहंकारात् पंचतन्मात्राण्येवमादि संख्यानपरेत्यर्थः। एवं न्यायविद्या
नामेतावन्मात्रं प्रयोजनं नान्यः पुरुषार्थ इति भावः। तथैव मीमांसादित्यर्थः। समुपस्थिता समीपं गतेत्यर्थः। आकाशस्येव उपहासपंथा
न वर्तितेत्यर्थः।।

चक्रोधेवा वाले असंबद्ध निरंतरानस्यनरी तेवउत्तविधेभ्यः परमाणुभ्यो विश्वजगदुत्पद्यते तत एव उपादानभूतानामित्यर्थः॥ निमित्तका
रणं कर्तृत्वात्कुलालवदिति भावः॥ एतच्चान्यायविद्याया उत्तरं पातंजलयोग उत्तरमाह। आपादेइति। वेदांतिनो हि भगवतः सकलकार्योपा
दानत्वं मन्यते। तच्च मन्मदइव विकारितया संगच्छते। तथा हि। वस्त्वयं विकुर्वाणा घटशरावाद्युपादानं भवति। तथा स्वयं विकुर्वन्नीश्वरो
जगदुपादानमित्युपगंतव्यं। तथा च भगवतो घटइव विकारित्वादिना पित्वं सिध्यतीति भावः॥ सांख्यमतकी विद्याया उत्तरं नक्तीति। प्रधा
नान्महतः पुरुषस्योदासीनत्वादिति भावः॥ एवमनेककुतर्कैः पिहितान विवेकपश्चानाह। राजा विवेक इत्यर्थः। परमाणुनो प्रधानस्य
वप्रमेयत्वहेतुना कार्यत्वं सिद्धेन तदुपादानमपेक्षणीयं। एवं तत्तत्रापीत्यनवस्थास्यात्। अतो प्रमेयपरमात्मैव उपादानं नान्य ते

श्वावाचाले परमाणुभ्यो विश्वमुत्पद्यते निमित्तकारणमीश्वरः अन्यथाउसंक्रोधमुक्तं। आः पापे कथमीश्वरमेव विकारिणं द
त्वा विनाशधर्माणमुपपादयसि। ननु रे प्रधानादिभ्यो त्पत्तिः॥ ।राजा॥ ।अहो दुर्मतयस्तर्कविद्यास्तदपि न जानंति सर्वप्रमेयत्वा
तं घटादिवत्कार्यमिति परमाणुप्रधानोपादानमप्यपेक्षणीयमेवेति। तथा हि। ।अंतः शीतकरांतरिक्षनगरं स्वप्नेंद्रजालादिव
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत्। शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरावस्तानेव जगत्तथा समयते॥ त्वावबोधो दयात्॥ कः

एतदेवोपपादयति। तथा हि अंतःशीतकरेति। एतस्यादिदृश्यमानं जगत्कार्यं अर्थतः असत्यं अनिर्वचनीयं मिथ्येति यतस्तद्विभ्रमईना
तिरोधः॥ कार्यत्वं समर्थयति। मेयमिति। प्रमाणगोचरमित्यर्थः॥ अत्र दृष्टांतः। अंतः निशीतेऽनलचंद्रः अंतरिक्षनगरं गंधर्वनगरं स्वप्नः
सिद्धः इंद्रजालं मंत्रौषधादिना यथास्थितस्य वस्तुनोऽन्यथा प्रत्यापनं। आदिपदान्मरुमरीचिकादिपरिग्रहः तद्वत्। यथा हि जलचंद्रादि
मेयं सत्कार्यं। ततश्चानिर्वचनीयं तथा जगदपीति भावः॥ सर्वं जगतो मेयत्वमुपपादयति। उदयो जन्म ध्वंसो विनाशादिपदाद्वृध्यादयो गृ
ह्यंते एतद्युक्तमित्यर्थः॥ जगतो स्थित्यादौ अन्यसापेक्षत्वान्न स्वरूपप्रकाशत्वं आत्मनस्तु अन्यनिरपेक्षत्वात्स्वप्रकाशत्वं। तथा चात्म
प्रकाशविषयत्वान्मेयत्वं जगत इति भावः॥ ननु अद्वितीयपरमात्मनो जगदुपादानत्वे जगतोऽनित्यत्वापत्या तत्समनुपपत्तिः। नन्वपादा
ननाशं विना अवयवविनाशं विना कार्यनाशासंभवात् तस्या दोषं निराकरोति स्वात्मावबोध इति स्वप्रकाशे हरौ परमात्मनि अज्ञानेन तिजगत् ४६
न वति तत्स्थले तत्त्वावबोधोदयात्तत्वसाक्षात्कारादस्तमयते लीनं भवतीत्यर्थः॥ उक्तमर्थं दृष्टांतेन दृढयति। शुक्तौ रूप्यमिव स्रजि भुज

गमिव। यथा हि शुक्तौ रजतभ्रमस्य अज्ञानां रजतोपरागो आविर्भवति। न यो भवतत्वज्ञानात्समतोपरागनिवृत्तिर्नहि तत्र शुक्त्यादिनाशोव
यवविनाशो वा पेक्ष्यते एवं प्रकृतेऽपीति भावः॥ पार्श्वस्थो पूर्वपक्षं निराकरोति। विकारशंकाविति। मुग्धवधूः पामरपत्नी विक
ल्पो मनो विकारस्तद्विलसितं तच्चेष्टितमित्यर्थः॥ शांतमिति। शांतमुपद्रवरहितं ज्योतिः प्रकाशरूपं विश्वोत्पत्तौ निरूप्यमाण
मपि निर्विशेषं। विश्वतिं विकारं कथं प्रजनति न कथंचिदित्यर्थः॥ कीदृशं ज्योतिः अनुदितानस्तं उत्पत्तिविनाशरहितं नित्यप्र
काशस्वरूपमित्यर्थः॥ तथा निःकलंकं निरवयवं अमतिनिर्मलं अविद्यास्तत्दोषरहितं एवंभूतं सर्वथा विकारयोग्यमिति भा
वः॥ अंबुवाहावलीनां मेघपंक्तीनां प्रादुर्भावे सति नभसः आकाशस्य कीदृशो विकारः न कीदृशोपीत्यर्थः॥ कथंभूतानामंबु

विकारशंका मुग्धवधूविकल्पविलसितमिव। तथा हि। ।शांतं ज्योतिः कथमनुदितानस्तनित्यप्रकाशं विश्वोत्पत्तौ व्र
जति विकृतिं निष्कलंकं निर्मलं च। शश्वन्नीलोत्पलदलरुचामंबुवाहावलीनां प्रादुर्भावे भवति नभसः कीदृशो वा विकारः॥ ।
पुरुषः॥ ।साक्षेपमेणयतिनामधेयज्ञावतो विमर्शः॥ उपनिषदं पश्यति। ततस्ततः। ।उपनिषत्। ।ततः सर्वानिरेव कुह्वापि
तस्कं। अहो विश्वविलयेन मुक्तिमेषा वदंती कथं प्रस्थिता निरुपिता मितिसस्तंभं महद्दुपता। ।सर्वे सत्रासं। ।पुरु
षः। ।सत्रासं। ।उपनिषत्। ।ततोहं सत्वरं परिक्रम्य दंडकारण्यप्रविष्टा। ततो मंदरशैलोपकल्पितस्य मधुसूदनस्या
यतनस्य नातिदूरे। ।वाकोर्जस्मादलितमणयाः श्रेणयः कंकणानां तृटाः स्रग्भग्निक्तिनिर्दलिता केशपाशाः छिन्ना मुक्ता
वलिरपततं वस्त्रमेगादुकूलं। ।पुरुषः। ।ततस्ततः। ।उपनिषत्। ।ततो देवायतनान्निर्गत्य गदापाणिभिः पुरुषैरति
दीर्घं ताड्यमानास्ततो दिगंतमतिक्रांताः। ।सर्वे सहर्षं साधु साधु। ।राजा। ।न खलु नवतीमतिक्रामंतो भगवान्विश्वसाक्षी
द्रष्टा ते पुरुषः। ।ततस्ततः। ।उपनिषत्। ।गीतागीतायनमध्यगं तन्नपुरात्संप्रविष्टा। ।तत्र वसंत्या गीतया मां तत्रागतामा
लोक्य सस्नेहं ममेव मातरिति पादयोः पतिता परिरभ्य वोपवेशिता स्मि विदितवृत्तांतया चोक्तं।
बाहावलीनां शरुविरंतरं निविडं यस्य नीलोत्पलदलं तद्वत्कृष्णवर्णानां। इयं लोकदृष्टांतेनोपपादयति। वाकोरिति। व्याख्यातं पूर्वार्धे
मुक्तावलिः छिन्ना मुक्ताहारस्त्रुटित इत्यर्थः॥ अंगात्कटस्तं दुकूलं विकलं बलात्मादाहीतमित्यर्थः॥ देवायतनात् देवगृहात् पुरुषैः विष्णोरुक्तलोक
स्य चतुर्व्यत्वरणेन निरूपयति। जातेति। अथ अनंतरं गीतागीतान्यमध्यप्रविष्टा। कथंभूतो गीताजन्तपुरासक्त रात्यवहंभस्यर्थः। विदितवृत्तां

तयाज्ञातसमाचारयासारत्वमानहमिति। अहं तान्नराधमान्संसारेष्वासुरीष्वेव योनिषु क्षिपाम्यासुरीष्वेव योनिषु त्यक्षिप्तानेषु क्षिपामि। क
येऽभूतान्नराधमान् क्रूरान् द्विषतः अशुभान्। तथा अशुभान्। एवं भूतानां संसारेषु पुनः पुनर्जन्मलयत्याग। स्वमेव संपादयामि तावत्।
प्रसंगादाह। देवीति। सकोपमिव। उवाच विशेषः। कोनाम भूत्वा। आत्मानं स्वस्वरूपं भगवतमात्मस्वरूपमज्ञानं तं प्रतिज्ञातरं ददाति न कोप
त्यर्थः। तत्र दृष्टांतो बधमिव। यथाहि श्रीबंधनकोपघुनरपतितये त्यर्थः। असावीति। असो पयापद्विपापाद्यमानः सनातनो देवः ईश्वरस्तदन्यो
नान्यत्पुरुषो समानदेवात्परो न। अनेन परस्परभेदा इत्यदर्शिता। ननु तर्हि कथं भेदज्ञानमित्याशंक्याह। स एव ईश्वरो भिन्न एव तं
अनादिमायया अनाद्यविद्यया भिन्नोऽभेदं ज्ञानं च विधाप्रकृतनभेदे सति कथमीश्वर एवाहमित्याशंक्य भेदो मिथ्यात्वतोऽभेदं नि

अंब नाथ खेदयितव्यं मनः। ये खलु त्वामप्रमाणां तन्मयपथे एव मनुरस्त्वा प्रचारयंतीति तेषामीश्वर एव शास्ता। उक्तं च भगवता
तेन त्वामधिक्षिप्य। तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासु- रीष्वेव योनिष्विति। ।पुरुषः। ।सहृ
र्षं। देवि त्वत्प्रसादाद्दृष्टुमिच्छामि कोऽयमीश्वरो नामेति। ।उपनिषत्। ।सकोपमिव। कोनामांधमिवात्मानं महान्तं तेनैव ग.
मे ब्रह्मन्करं ददाति। ।पुरुषः। ।सहर्षं। कथमहमेव परमेश्वरः। ।उपनिषत्। ।एवमेतत्। तथाहि। ।असौ त्वदन्यो न सना
तनः पुमान्न भवान्न देवात्पुरुषोत्तमात्परः। स एव भिन्नस्त्वमनादिमायया द्विधेव बिंबं सलिले विवस्वतः। ।पुरुषः। ।वि
वेकं प्रति भगवन्नुक्तमप्यर्थं भगवत्यानसम्यगवधारयामि। ।

रूपमित्याह। सलिले विवस्वतः सूर्यस्य बिंबमिव मंडलं द्विधेव द्विप्रकारमिव नन्वेदं जलोपाधिकबिंबप्रतिबिंबरूपं द्वैधं। अभिन्नस्य
रवेर्विरोधिन्नवतिनयेत्यर्थः। जीवपरमात्मरूपो भेदको पाधिकृता अविद्या एकैवेति विवरणाचार्याः। तदा एक एव जीवोऽस्तरव्यवहा
९ रव्युत्पादनं तु प - वाह्यानैरावर्णरासक्तिर्भवति। अन्ये त्वनेकजीववादिनोऽनेकाविद्या इत्यूचिरे। उभयपक्षेऽपि साधकबाधकानि लिखं
ते। अत्र जीवेश्वरभेदो वच्छिन्नानवच्छिन्नत्वरूपेणेति केचिदाहुः। तन्न। अवच्छिन्नत्वस्य अव्याप्यवृत्त्या ईश्वरस्य व्यापकत्वं स्यात्। नहि
भवानवच्छिन्नत्वं सर्वस्मिन्नाशप्रोक्ति। भगवच्छिन्नाशेऽभावात्। तथा च सर्वज्ञत्वं सर्वोपादानत्वं व्यापकत्वं च न स्यात्। इदमेवाभिप्रेत्य
ग्रंथकारो बिंबप्रतिबिंबमाह। सूर्यसलिलदृष्टांतेन तत्र च बिंबमीश्वरत्वं तद्व्याप्यवृत्त्येवेति न किंचिद्बाधकं इत्यनेन प्रसक्त्याविनाज्ञ ४७
विचारं जायमानं जीवपराभेदज्ञानं अनवधारणरूपं अप्रयोजकमित्याह पुरुषमुखेन। पुरुषेति। अत एव तत्त्वमस्यादिवाक्यज्ञा

मानं॰॰॰ इदानीं विचारानंतरं तत्त्वज्ञानमभेदप्रमाणाकारमेव परं त्वनवधारणात्त्वान्याकार्यक्षमत्वं सर्वस्य कार्यक्षमत्वं च
परस्येति भावः। उपनिषदर्थं स्वस्याः संभावनां दर्शयति। अवच्छिन्नस्येति। इयं देवि उपनिषत् अवच्छिन्नस्य भेदवतो जरामरणधर्मि
णः एवं भूतस्य मामनित्यानंदचिदात्मतां अविनाशि मुख्यत्वानंदरूपात्मभेदं ब्रवीति प्रतिपादयति तथा च संभाविप - मर्थ इति भा
वः। पदार्थज्ञानाभावे पदार्थयोः सम्यगवबोधादित्यर्थः। वाक्यार्थानवबोध उपनिषदुक्ततत्त्वमस्यादिमहावाक्यार्थस्य जीवपराभेदरूप

अवच्छिन्नस्य भिन्नस्य जरामरणधर्मिणः। ममनश्वरं ब्रवीति देवीयं नित्यानंदचिदात्मतां। ।विवेकः। ।पदार्थाज्ञानादयं वाक्यार्थो
न बबोधस्ते। ।पुरुषः। ।तदवबोधायभवानुपायं ज्ञापयतु। ।विवेकः। अयमुच्यते। ।एषोऽस्मीति विविच्यते नपरतः
क्षितेन सार्धं वत्सेत त्वां निविजये विदात्मनि परिज्ञाते त्वमर्थे पुनः। अकृत्वा तत्त्वमसीति बाधितं भवद्धांतं तदात्मन्यभेदशांतं ज्यो
तिरनंतमतरुदितानंदसमुद्यानते। ।पुरुषः। ।सानंदं कृतमर्थं परिभावयामि। ।ततः प्रविशति निदिध्यासनेनादिष्टो
स्मि भगवत्या विष्णुभक्त्या निगूढमस्मदभिप्रायं उपनिषद्विवेकेन सह बोधयितव्या त्वया च पुरुषे वक्तव्यमिति। विलोक्य ए
षा देवी विवेकपुरुषाभ्यां नातिदूरे वर्तते। यावदुपसर्पामि। उपसृत्य उपनिषदं प्रति। जानाति देव्या विष्णुभक्त्या समादिष्टं। यथा
सुकल्यचोलया देवता भवंतीति॥ ॥ ॥सा॰॰ स्यानिध्यासनार्थः। एषोऽस्मीति। चिदात्मनि तस्य दार्ष्टांतिकं॰॰ स्वरत्वेतन्येत्व
दर्थं त्वंपदार्थे निरस्ताहंकारचैतन्ये च परिज्ञाते सम्यक् ज्ञाते न तिष्ठन् नरमेनेन तत्त्वमसीति उपनिषदं महावाक्यं श्रुत्वा तदात्मप्रभे स श्री
प्रकाशे ज्योतिरिति मनोवृत्तौ समुदितेऽखंडवाक्यार्थरूपं प्रकाशते। कीदृशं ज्योतिः। बाधितेनापितेन वधांतं संसारतमो येन तथा
पुनः कीदृशं। शांतं उपद्रवरहितं अनंतं अविनाशि तथा उद्योतितानंदं आवरणनाशाद्भूतानंदमित्यर्थः। तत्त्वंपदार्थयोः शोधनप्रका
रमाह। कस्मिन्सति। एषोऽहं कारः अस्मि इति विविच्य नसार्धं विविच्य पृथक्कृत्य अर्थाच्चापदार्थं। तत्त्वानामात्मोपाधिनामिति सर्वो
कामार्गणविलये कृते सति मिथ्यात्वे समर्थिते सतीत्यर्थः। इति शोधिततत्त्वंपदार्थज्ञानानंतरं अंतःकरण एव विवेकवतं असंभावना
विपरीतभावनानीरस्तत्त्वमसीति महावाक्यार्थस्फुरणं निश्चयरूपं भवतीति एवं श्रवणमनना अनंतरं कृतचितस्य निदिध्यासनादिति
न आनस्य प्रवेशमाह। ततइति। गूढं गूढं यथा स्यात्तथा उपनिषद्विवेकेन सहास्मदभिप्रायं बोधयितव्येति योजना। उपनिष
त् विवेकयोरग्रे मा अस्मदाधावा भवबंधकेति निर्गलितोऽर्थः॥ ॥ ॥

संकल्पस्य छायासैवत्रेतिगम्यमित्येद्युर्थः। तत्रादेनाः नत्वन्येषामिवल्पात्पुंसो मिथुनजावापेक्षेतिभावः। समानाधानेनयोगसाम
र्थ्येन आपन्नसत्वा प्राप्तगर्भाविवेकेन संकल्पमात्रेणगर्भाधानादितिभावः। क्रूरा विद्यायोविश्वविलापकत्वादितिहृदयं। संक
र्षणविद्यया अन्यत्र स्थितस्यान्यत्रनयनेकर्षणंतत्रविद्यामंत्ररूपात्येत्यर्थः। यथाहि। देवकीगर्भाद्रोहिणीगर्भेबलदेवस्य
नयेतिभावः। तत्रविद्यांतःकरणवृत्तिधान्यात्मनसिसंक्रमणं प्रबोधस्यचचैतन्यप्रधानत्वात्फलरूपत्वेन पुरुषेसं
क्रमणमितिहृदयं। ध्यानेनादयतिनिदिध्यासनस्यध्यानरूपत्वादितिभावः। उद्दामेति। इयंकन्याविद्यारूपासहसाअकस्मा
मयासमाधिनाविदितेनत्। यथा आपन्नसत्वाभवतीति। तत्रवसा क्रूरसत्वाविद्यानामकन्याचत्वंडदरेवर्त्तते। प्रबोधचं
द्रस्तत्रविद्यांसंकर्षणविद्ययामनसिसंक्रमय्य अस्मि। प्रबोधचंद्रंचपुरुषेसमर्प्यवसेविवेकेनसहमत्सकाशमा
गमिष्यसीति। ।उपनिषत्। ।यदादिशतिदेवीविवेकमादायनिष्क्रांता। निदिध्यासनंपुरुषंप्रतिविशति। ।पुरुषः। ।
ध्यानेनादयति। नेपथ्येआश्चर्यं। उद्दामद्युतिदामभिस्तडिदिवप्रद्योतयंती दिशः प्रत्यक्षस्फुटदुत्कटास्थिमनसोनिर्विघ
वक्षस्थलं। कन्येयंसहसासमंपरिकरैर्मोहंग्रसंतीजज्ञत्यंतर्धानमुपैतिवैषपुरुषंश्रीमान्प्रबोधोदयः। ।ततःप्रवि
त प्रबोधचंद्रोदयः। ।प्रबोधचंद्रोदयः। ।किंप्राप्तंकिमपोहितंकिमुदितंकिंवासमुच्छावितंस्मर्तं किंनुविलापितंनुकिमि
दंकिंचिन्नवाकिंचन। यस्मिन्नभ्युदितेविकल्पपदवीनैवंसमारोहतिचैलोक्यं सहजप्रकाशदलितंसोहंप्रबोधोदयः॥ ॥
दंतर्धानंतिरोधानंगच्छति। कीदृशी। मनसावक्षस्थलंनिर्भिद्यनिर्गताइतिशेषः। पुनःकीदृशी। उद्दामाभिःद्युतिभिःदामभिःप्रकाशैस्त
डिदामभिर्मालाभिर्दिशःप्रद्योतयंती प्रकाशयंती। कथंभूतंवक्षःस्थलंप्रत्यक्षंस्फुरंतिभिंदंप्राक्रवंतिउत्कटानिमहांतिअस्थीनि
यस्मिंस्तत्तथा। पुनःकथंभूता परिकरैःसमंमोहंग्रसंती उत्पन्नमात्रैवमनोमोहादिसर्वंविलापयत्युपमर्दयतीतिभावः। वपुनः
एषःश्रीमान्प्रबोधोदयःपुरुषमुपैति। किंहितमिति। सोहंप्रबोधोदयः अस्मीतिशेषः। सःकः। यस्मिन्प्रबोधेअभ्युदितेसतिचैलो
क्यमेवंअमुनाप्रकारेणवितर्कपदवींतर्कविषयंनसमारोहतिनप्राप्नोति। कथंभूतंचैलोक्यं। सहजप्रकाशेनदलितंतिरोहितमित्यर्थः।
तर्केनैवविशदयति। किंप्राप्तंकिमाक्रांतमित्यर्थः। किमपोहितंकिंअपाकृतमित्यर्थः। किमुदितंकिमुदितमित्यर्थः। किंवासमुच्छावितं। किंनस्त
मुन्मीलितमित्यर्थः। स्मर्तं। किंनुलोपितंकिंनुप्रस्थापितमित्यर्थः। विलापितंकिंनुविलीनंगतंइत्यर्थः। इदंकिंचिदितिसर्वत्रानुषंजनीयं। प्रबोधात्पूर्वं
हि संसारावस्थायां वैबलोपविषयोनेकलकतज्जबतिज्ञातेचप्रबोधे अज्ञातमेवप्रकाशतेनान्यत्किंचिस्फुरतीतिभावः। विद्याप्रबोध
योर्निर्विकल्पस्वरूपतया आकारस्यनिरूपयितुमशक्यत्वादस्यैवनटद्वारा विद्याप्रबोधवतोनिरूपयितव्येयं। विद्युदितिभाशितं।
तिमिरपटलममहानान्धानंयस्मिन्नेवभूतप्रजातमिवप्रजातजातं। संसाररूपात्मधर्मादित्यर्थः। मोहेति। कोपिनिराकारो
निरूपयितुमशक्यः बोधरूपास्तरश्मिप्रबोधचंद्रोभजनिजनितायेप्रबोधचंद्रेण। अथ विवेकमतिशांतिप्रमादिरूपंविश्वा
त्मकंजगत्स्वरूपविष्णुस्वरूपंस्फुरितंप्रकाशते। एषअहंविष्णुस्वरूपंस्फुरामीत्यर्थः। किंत्वयामोहेत्यनंतदेवांधकारमव
ष्टयनिरस्तत्यविकल्पोत्रमस्वरूपा निद्रा उन्मोचयत्यक्रोधमादिकेनेतिपाठेनेनचाविवेकमतिलरांनियमादिकेनबोधचंद्र
षाररश्मिरजनीत्यन्वयः। तयाच जीवन्मुक्तःसर्वंविष्णुमयंइतिस्फुरतीति। ज्ञानसाक्षात्कारस्याव्यवहारअस्यावस्थानिरूपयति।
परिक्रम्यएषः पुरुषायावदुपसर्पामि। उपसृत्यभगवन्प्रबोधचंद्रोदयोहमभिवादये। ।पुरुषः। ।साक्षादेहिवत्सं
परिष्वजस्वमां। ।प्रबोधचंद्रोदयस्तथाकरोति। ।पुरुषः। ।आलिंग्यसानंदं। अहोविघटिततिमिरपटलंज्ञानमातं। तथाहि।
मोहांधकारमवधूयविकल्पनिद्रामुन्मोच्यकोप्यजनिबोधतुषाररश्मिः। अथाविवेकमतिशांतिरामादिनेनविश्वात्मकं
स्फुरतिविष्णुरहंसएषः। सोहमिदानीं। ।संगंनकेनचिदुपेत्यकमप्यप्च्छन्कामप्यतर्कितफलां विदिशंदिशंवा। शांतोव्यपेतभय
शोककषायमोहःसायंगृहोमुनिरहोभविताऽस्मिसद्यः। ।ततःप्रविशतिविष्णुभक्तिः। ।विष्णुभक्तिः। ।सहर्षमुपसृत्यचिरेणवत्
सअस्माकंपरिपूर्णामनोरथाः। येनप्रशांताराति:नवंतमवलोकयामि। ।पुरुषः। ।देव्याःप्रसादात्किंनामदुःकरमितिपादयोः
पतति। ।विष्णुभक्तिः। ।पुरुषंसमुत्थापयति। उत्तिष्ठवत्सकिंतेभूयःप्रियमुपकरोमि। ।पुरुषः। ।भगवतिअतःपरमपिप्रियमस्ति।
संगंनकेनचिदिति। सोहंममायंकोपजनितस्थाननेवगृहस्यएताहृशोमननशीलोमुनिःसद्योभवितानविष्यामीत्यर्थः। केनचिसं
गंनउपेत्यप्राप्यकिमपिअप्रच्छन्तथादिशंप्राच्यादिकांविदिशंअवांतरदिशांगंवाअर्पयन्नित्यनुषज्यते। तथाशांतोरागद्वेषरहितः
तथाव्यपेतमपगतंभयशोककषायकर्ममोहश्चयस्यताहृशः। हर्षोक्तोअहमोदिरुक्तिः। तथाज्ञानेनाविश्रुतसर्वंयाप्रयोगमनाना

वान्यागमनदिंद्रियमोनकिंचिद्दृष्टव्यं नवरिष्यंत्यर्थः सकलनियमोपेक्षितइतितात्पर्यं। प्रशांताराति खलमोहं अन्यं महमस्यात्मारं तु खवं।
अतस्तत्फलमेवापतप्रशांतेति। विवेकहृतेरात्यसंपन्नप्रयोजनत्वमगमत्। कीदृशः प्रशांतारातिः क्षतमोहः विवेकेनहि विष्णुभक्ति
प्रसादात्महामोहनाशपूर्वकं विधाप्रबोधोत्पादितावितिभावः। नीरजा रजआदिकमलरहितेसदानंदे नित्यानंदेपदे जीवन्मुक्तिलक्ष
णेअहंनिवेशितः। तथापि ममविष्णुभक्तिप्रसादाज्जीवन्मुक्तिर्नाम इतःपरंनान्यः पुरुषार्थ इतिभावः। लोकातीतमहार्थं प्रपततोतत
थापीति। पर्जन्यइति। पर्जन्यः अस्मिन्जगति महतीं वृष्टिं विधत्तां करोत्वित्यर्थः। अतिवृष्टिं वारयति। इष्टिः ईप्सितान् प्रतिव
ष्टिर्वांछिता कस्यचिदितिभावः। राजानः क्ष्मां पृथ्वीं पालयंतु। कीदृशाः। गलितोनष्टो विषयोपप्लवो देशोपद्रवो येषां तादृशाः।

प्रशांताराति रगमद्विवेकः सततस्त्यतां। नीरजाक्षि सदानंदे पदे चाहं निवेशितः॥ ।तथाप्येतदस्तु। ।पर्जन्योस्मिन्जगति
महतीं वृष्टिमिष्टां दधातु राजानः क्ष्मां गलितविषयोपप्लवाः पालयंतु। तत्त्वोन्मेषापहृततमसस्त्वत्प्रसादान्महांतः सं
साराब्धिं विषयममतातंकपंकं तरंतु॥ ॥विष्णुभक्तिः॥ तथास्तु। इतिनिःक्रांताः सर्वे॥ ॥इतिश्रीकृष्णमिश्रविरचि
तप्रबोधचंद्रोदये षष्ठोंकः॥ ॥समाप्तंचेदं प्रबोधचंद्रोदयंनामनाटकं॥ छ॥ ॥श्रीमद्गणपतिर्जयति॥ ॥ ॥

महांतः संसाराब्धिं तरंतु त्वत्प्रसादादितिसंबंधयोजनीयं। कीदृशा महांतः। तत्त्वोन्मेषात्तत्त्वसाक्षात्कारात् अपहृतं नाशि
तं तमोऽविद्यायेषां तादृशाः। संसाराब्धिं कीदृशं विषयाः स्रक्चंदनवनितादयः ममता मदीयत्वाभिमानः अपहृतायामप्युपलक्षणं
आतंकोभयं एतद्रूपंकर्दमोयस्मिन्तं। अनेन दुस्तरत्वमुक्तं। इदंनवचनांकोटे तेआशीरूपंमंगलमिति। तदुक्तं। आशी
र्नमस्क्रियावस्तुनिर्देशोवेति। तथाचायं निर्गलितोर्थः। सर्वस्यनाटकस्यजीवस्यदिसाकारदुरंतराः कामक्रोधलोभादयः
मुक्तिपरिपंथिनः पार्वडशास्त्राणि तदागमाश्च एवं सति विष्णुभक्त्यैव सहायेन मुमुक्षुणा वस्तुविचारेण कामं क्रमणा क्रोधं सं
तोषेण लोभं नित्यादिदृष्टेन करात्या कामादीन्यापंडागमेशाश्चाणि विचिंत्य श्रवणं विधाय पश्चाद्विवेकतद्ययेनमननं तथा
निदिध्यासनं च विधाय तत्त्वसाक्षात्कारो जननायः। तेनचमोहनाशः संपादनीयः। ।एवंसति सर्वत्रजीवन्मुक्तिरित्यलं विस्तरेण ४९

आसीद्विवोपनामा प्रभुर्विदितयशा रामकृष्णोतिविद्वान् तस्माज्जातोपि विनीतो विविधगुणनिधिर्विश्वनाथोवतीर्णः। तस्मात्प्रख्या
तकीर्तिर्विविधसुखलतः प्रादुरासीद्भवान्यां श्रीमत्यां योगऐशो भुवि विदितगुणास्तस्य चित्तं द्विकाख्या। ।नत्वाहंतंस्वकमनाति
किंचित्सिद्धंनक्षतिगोचरं वा। करोमिटीका निरंकुशोयं विद्वद्विकानंदविबोधनाय। ।मनतो ज्ञानतो वापि च्छुटुदापुष्टयन्मतं।
तज्ज्ञाः क्षमध्वं सहृत्वापराधयत्नसादरं। । इतिश्रीनानाविश्वनाथपदादितिकृतगणेशविरचितायांप्रबोधचंद्रोदयटीका
यांषष्ठोंकः समाप्तः॥ छ॥ संवत् १७७७ वर्षे ५ चैत्रशुक्लचतुर्थ्यां दी। बोरेश्वरसुनबालकेन लिखितमिदंनाटकं सूर्यपुरे। श्रीगणेशः।

५०

॥प्रबोधचंद्रोयनाटकसटीकसंपूर्णपत्र५०॥